Vedanta Series No. 3.

KATHOPANISHAD

WITH THE

SANSKRIT TEXT, ANVAYA, VRITTI, WORD MEANING,

TRANSLATION, NOTES AND INDEX

BY

SRIS CHANDRA VASU,



Published by the Panini Office

Bhuvaneshvari Asram,

Bahadurganj.

Allahabad:



PRINTED AT THE ALLAHABAD PRESS, ALLAHABAD.

1905.

Price Re. 1-8.

TO

Mrs. ANNIE BESANT

WITH THE

MOST AFFECTIONATE REGARDS

OF

THE TRANSLATOR.



अथ यजुर्वेदीयकठोपनिषद्प्रारम्भः

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै॥

ॐ शांतिः शांतिः शांतिः॥

हरिः ॐ

MANTRA 1.

॥ ॐ ॥ उशन् ह वै वाजश्रवसः सर्ववेदसन्ददौ।
तस्य ह नचिकेता नाम पुत्र आस॥ १॥

अन्वयः—उशन् (कामयमानः फलं) हवै वाजश्रवसः (ऋषिः) सर्ववेदस (सर्वस्वं) ददौ (दत्तवान्) तस्य नचिकेता नाम पुत्र आस (बभूव)

वृत्तिः—(उशन्वैवाजश्रवस इति) "उशन्" कामयमानः। वश कान्तावित्यस्माच्छतरि। ग्रहिज्येत्यादिना संप्रसारणम्। "ह" "वै" इतिवृत्तार्थस्मरणार्थौ निपातौ। फलमितिशेषः।

"वाजश्रवसः" । वाजेन अन्नेनदानादिकर्मभूतेन, श्रवः कीर्तिर्यस्य स वाजश्रवाः । तस्यापत्यं वाजश्रवसः रूढिर्वा- वाजश्रवस इति । स किल ऋषिर्विश्वजितासर्वस्वदक्षिणेन यजमानः तस्मिन् क्रतौ "सर्ववेदसं" सर्वस्वं दत्तवानित्यर्थः । उशन्नित्यनेन कर्मणः कास्न्यत्वाद्दक्षिणासाद्गुण्यस्यावश्य- कत्वमितिसूच्यते। "आस" बभूव। छन्दस्युभयथेतिलिटः सार्व- धातुकत्वात् । स्वस्तयेताक्ष्र्यमित्यादिवदस्तेर्भूभावाभावः ।

उशन् us'an (इच्छन् कामयमानः, वशधातोः शतृप्रत्यये = उश इतिरूपं) wishing, desiring (the fruit of Vís'vaji sacrifice)

ह ha (ह वै वृतार्थ- स्मरणार्थौ निपातौ) once.

वै vai, now.

वाजश्रवसः vâjas'ravasah (वाजं = अन्नं, श्रवस = यशः, तस्य अपत्य Vâjas'ravasa, Uddâlaka.

सर्ववेदसं sarva-vedasam (सर्वस्वं धनं) all-wealth, all-know ledge, all the Veda instruction.

ददौ dadau (दत्तवान्) gave,

तस्य tasya (यजमानस्य) his.

ह ha (mere expletive)

नचिकेता nachiketâ, Nachiketâ.

नाम nâma, called.

पुत्रः pûtrah, son.

आस âsa (बभूव) was.

Desiring once (the heaven-worlds), Vajasravasa gave away all his wealth. His was a son called Nachiketas.

MANTRA 2.

तꣳह कुमारꣳ सन्तं दक्षिणासु नीयमानासु
श्रद्धाऽऽविवेश सोऽमन्यत ॥ २ ॥

अन्वयः—तं (नचिकेतसं) कुमारं सन्तं (बालमेव सन्तं), ऋत्विग्भ्यो दक्षिणासु गोषु नीयमानासु सतीषु श्रद्धा आविवेश (आविष्टवती) ॥ सः अमन्यत ॥

वृत्तिः—(तंह कुमारंसन्तमिति) "तम्" नचिकेतसं "कुमारं सन्तम्" बालमेवसन्तं ऋत्विग्भ्यो "दक्षिणासु" "गोषु" "नीयमानासु" सतीषु "श्रद्धा" आस्तिक्यबुद्धिः पितुर्हितकामप्रयुक्ता "आविवेश" आविष्टवती । यद्यपि यदानतिकरंद्रव्यम् तद्दक्षिणेत्युच्यते । एकाचासौक्रतावानतिरिति तदुपाधिको दक्षिणाशब्द एकवचनान्ततामेवलभते। अतएवभूनामकैकाहक्रतौ । तस्य येनदक्षिणेत्यत्रकृत्स्नस्य गवाश्वादेः प्रकृतस्य दाक्षिण्यस्य निवृत्तिरिति । तस्य धेनुरिति गवामिति दाशमिकाधिकरणे स्थितम् । तथापि दक्षिणाशब्दोऽयंभूतिवचनः । स च कर्मापेक्षयापि प्रवर्तते । अस्मिन् कर्मणीयं भूतिरिति । कर्तुरपेक्षयापि प्रवर्तते। अस्मिन्कर्मण्यस्यपुरुषस्येयं भूतिरिति। ततश्च ऋत्विग्बहुत्वापेक्षया दक्षिणाबहुत्वसम्भवाद् दक्षिणास्विति बहुवचनमुपपद्यते । अतएव ऋतवे यजौदुम्बरः सोमचमसोदक्षिणा स प्रियाय सगोत्राय ब्रह्मणेदेय इत्यत्र वाक्यतापत्ते ब्रह्मभागमात्रेऽपि दक्षिणाशब्दस्यावयवलक्षणा-

मन्तरेण मुख्यत्वोपपत्तेस्तन्मात्रबाध इत्युक्तं दशमे । यदि ब्रह्मणस्तद्दानं तद्विकारः स्यादित्यधिकरणे । ततश्चक्रत्वपेक्षयादक्षिणैक्येपि ऋत्विगपेक्षयादक्षिणाभेदसम्भवाद्दक्षिणास्विति बहुवचनस्य नानुपपत्तिरिति द्रष्टव्यम् ।

तं tam (नचिकेतसं) him (Nachiketas).

ह ha, when.

कुमारं kumâram (प्रथम वयसं, बालं), a boy.

सन्तं santam (स्थितं) being (still)

दक्षिणासु dakshi*n*âsu (दक्षिणार्थासु) when the presents.

नीयमानासु nîyamânâsu (विभागेन—उपनीयमानासु, दीयमानासु) were being given to or brought (for the priests), to be led.

श्रद्धा *s*raddhâ (आस्तिक्यबुद्धिः) faith, strong desire (for the welfare of his father), earnestness.

आविवेश â-vi-ves'a (प्रविष्टवती) entered, Madhvâ's reading is विवेश without आ.

सः sa*h*, he.

अमन्यत amanyata, thought, said to himself, pondered.

Faith entered him, though still a boy, when the cows were being given as present to the priests. He thought.

MANTRA 3.

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः ।
अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत् ॥ ३ ॥

अन्वयः—पीतोदकाः जग्धतृणाः दुग्धदोहाः निरिन्द्रियाः, या एवंभूता गावः ताः ऋत्विग्भ्यो ददत्, अनन्दाः ते लोकाः सन्ति नाम खलु तान् स यजमानो गच्छति ॥

वृत्तिः—श्रद्धाप्रकारमेवदर्शयति (पीतोदका इति) "पीत" इति "पीत" मुदकं याभिस्ताः "पीतोदकाः"। "जग्धं" भक्षितं "तृणं" याभिस्ताः "जग्धतृणाः"। "दुग्धोदोहाः" क्षीराख्यो याभिस्ताः दुग्धदोहाः। "निरिन्द्रियाः" अप्रजननसमर्थाः। जीर्णा निष्फला इति यावत्। या एवं भूता गावः। "ताः" ऋत्विग्भ्योदक्षिणाबुद्ध्या "ददत्" प्रयच्छन्। "अनन्दाः" असुखाः ते शास्त्रसिद्धा "लोकाः" सन्ति "नाम" खलु। "तान् स" यजमानो "गच्छति"। एवममन्यतेत्यर्थः।

पीतोदकाः pîtodakâh (पीतं उदकं याभिः ताः 1) drunk water

जग्धतृणाः jagdha-trinâh (भक्षितं तृणं याभिः ताः 2) eaten hay or grass (but cannot do so now), burnt sacrificial wood or straw.

दुग्धदोहाः dugdha-dohâh (दुग्धोदोहः क्षीराख्यो यासा ताः 3) given milk. milked or abstemious.

निरिन्द्रियाः nirindriyâh (अप्रजनन समर्थाः जीर्णाः 4) barren, without strength (to breed), free from passion.

अनन्दाः anandâh (अनानन्दाः, असुखाः) Unblessed, joyless, or अः इति ब्रह्मेति श्रुतेः। अकारस्सर्ववागात्मा परब्रह्माभिधायकः॥ अकारोब्रह्म॥ अ-नन्द=ब्रह्मानन्देति अ means "Brahma", नन्द "joy", "full of Brahma-bliss."

नाम Nâma, called, surely.

ते te, those (well known).

लोकाः lokâh, जन्मानि, स्थानानि, worlds, births,

तान् tân, to them, to which.

सः sah (यजमानः), he.

गच्छति gachchhati, goes.

तं tam, him (*i.e.* to the son, the father being angry.)

ह ha, (आश्चर्यं) Behold! Hâ!

उवाच uvâcha, said.

मृत्यवे mrityave, (यमाय वैवस्वताय) to Mrityu the son of Vivasvat.

त्वा tvâ, (त्वां) thee.

ददामि dadâmi, I give (Madhva's reading is ददानि let me give).

इति iti, thus. (Namely the father said "Be thou dead."

He said to his father then: "O father! to what (priest) wilt thou give me." Twice and thrice, (he asked this question). The father said to him "To Death I give thee."

MANTRA 5.

बहूनामेमि प्रथमो बहूनामेमि मध्यमः ।
किंꣳ स्विद्यमस्य कर्त्तव्यं यन्मयाद्य करिष्यति ॥ ५ ॥

अन्वयः—(पुत्रः सशोकः पितरं उवाच) बहूनां एमि प्रथमः, बहूनां एमि मध्यमः ॥ किं स्विद् यमस्य कर्त्तव्यं यत् मया अद्य करिष्यति ॥

वृत्तिः—एवमुक्तोपि पुत्रः विगतसाध्वसशोकः पितरमुवाच (बहुनामेमीति) सर्वेषांमृत्युसदनगन्तॄणां पुरतः मध्येवागच्छामि । नतुपश्चात् । मृत्युसदनगमनेन कोपि मम विचार इति भावः । किंतर्हीत्यत्राह (किंस्विद्यमस्येति) मृत्युर्यद्द्यमयाकरिष्यति । तत्तादृशंयमस्यकर्त्तव्यं किंवा । पूर्णकामस्यमृत्योर्मादृशेन बालिशेन किं प्रयोजनं स्यात् । येन अ-

त्विगभ्य इव तस्मै मदर्पणं सफलंस्यात्। अतएतदेवानुशोचामीतिभावः।

बहूनां Bahûnâm, (शिष्याणां, पुत्राणां, or मुख्यवृत्तिमतां मरिष्यमाणानाम् मध्ये) ॥ Among many (pupils, or sons or persons of best conduct.) Persons of best conduct are those who serve their elders, unasked, whenever an opportunity of service arises. Or among the many who will die or are dying, I being the first, go to Yama.

एमि emi (गच्छामि) I go.

प्रथमः prathamah, first.

बहूनां bahûnâm, (मध्यमानां, मध्यमवृत्तिभाजां शिष्यादीनां) of many (belonging to the middling class; sons, pupils &c. who serve when asked to do so).

एमि emi (गच्छामि) I go.

मध्यमः madhyamah, middle. मृतानां मध्ये among many who are dead, I being the middle go to Yama. R. I go either in the front rank or in the middle of those who are going to the Yama's abode, but not the last, for many will still follow me : why should I grieve about it ; when death is inevitable to all.

किम् kim, what } both together mean "Or,
स्विद् svid, (वा) else } on the other hand."

यमस्य Yamasya, of Yama.

कर्तव्यं kartavyam, (प्रयोजनं) to be done, object, necessity R What does Yama want with a stripling like me, that I am to go to him to-day : Yama is above all desires and so I can be of no use

तथा tathâ, how.

अपरे apare (वर्तमानाः साधवः) others (good men who are alive.)

सस्यं sasyam, corn. (This illustration shows that death is ordained for all).

इव iva, like.

मर्त्यः martyah (मनुष्यः) the mortal, the man.

पच्यते pachyate (जीर्णो म्रियते) ripens, decays and dies or becomes cooked, becomes mature, fitted.

सस्यम् इव sasyam iva, like corn. Or "as (one's) merit." R. In a short time, he decays.

आजायते âjâyate (आविर्भवति) springs up, appears (Madhva reads जायते without आ.)

पुनः punah, again (as birth and death is the fate of all creatures, I feel no grief by being given to Death—to one where I must have gone some day)

Having looked behind those who have gone before (how firm they stood on truth,) so also having looked round (those) others (who are now living, how they also never renounced truth, thou shouldst follow their example.) The mortal (man) decays like corn, and is born again like corn.

MANTRA 7.

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् ।
तस्यैताꣳशान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥ ७ ॥

अन्वयः—वैश्वानरः (इव) अतिथिः ब्राह्मणः सन् गृहान् प्रविशति । तस्य (अग्नेः) एतां शान्तिं कुर्वन्ति (सन्तः) ॥ हे वैवस्वत उदकं हर (आहर).

वृत्तिः—एवमुक्ताप्रेषितः प्रोषितस्य मृत्योर्द्वारि तिस्रोरात्रीरनश्नन्नुवास। ततः प्रोष्यागतं यमं द्वार्थास वृद्धा ऊचुः (वैश्वानरः प्रविशतीति) साक्षादग्निरेवातिथिर्ब्राह्मणः सन् गृहं प्रविशति। तस्याग्नेरेतां पाद्यासनदानादि लक्षणां शान्तिं कुर्वन्ति सन्तः। तदपचारेणादग्धा माभूमेति। अतः हे वैवस्वत। नचिकेतसेपाद्यार्थमुदकंहर। आहरेत्यर्थः।

वैश्वानरः vais'vânara*h* (अग्निरिव) Fire (like fire.)

प्रविशति pravis'ati, enters.

अतिथिः atithi*h*, a guest.

ब्राह्मणः brâhma*n*a*h*, (ब्रह्मज्ञानी) a Brâhmana (a knower of Brahman.)

गृहान् grihân, in the houses दहन् इव (as if burning the houses, purifying the houses, see next verse.)

तस्य tasya (दाहं शमयन्त इव) of that (burning).

एतां etâm, this (offering of water for the feet, seat, &c.)

शान्तिं s'ântim, peace (or quenching.)

कुर्वन्ति kurvanti, they do.

हर hara (आहर) bring fetch, take.

वैवस्वत vaivasvata, O Vaivasvata.

उदकम् udakam (नचिकेतसे पाद्यार्थम्) water (for washing the feet of Nachiketas.)

(Then Nachiketas went to Yama. Yama had gone to another place and was not at home. The wife of Yama, offered welcome and pujá to the guest. But Nachiketas said "The host not being at home I cannot accept these

at your hand." Nachiketas thus remained for three days without food. When Yama returned, his wife said to him. R. Nachiketas did not enter the Palace of Yama, but remained at his gate; the above is addressed by the gate-keepers to Yama when he returned.)

Like fire a Brahmin guest enters the house. The (wise) quench (lit. make this quenching) it thus (by peace-offerings). Fetch water O Vaivasvat.

MANTRA 8.

आशाप्रतीक्षे सङ्गतꣳ सूनृताञ्
चेष्टापूर्त्ते पुत्रपशूꣳश्च सर्वान् ।
एतद् वृङ्क्ते पुरुषस्याल्पमेधसो
यस्यानश्नन् वसति ब्राह्मणो गृहे ॥ ८ ॥

अन्वयः—यस्य अल्पमेधसः गृहे अनश्नन् ब्राह्मणः वसति, तस्य आशा, प्रतीक्षे, संगतं, सुनृतां, इष्टा-पूर्ते, पुत्र-पशून् च सर्वान् एतद् वृंक्ते ॥

वृत्तिः—अकरणेप्रत्यवायं च दर्शयन्तिस्म । (आशा प्रतीक्षे इति) "यस्या" "ल्पमेधसः" अल्पप्रज्ञस्य पुरुषस्य गृहे "अनश्नन्" अभुञ्जानः अतिथिर्वसति । तस्याशा प्रतीक्षे काम संकल्पा । यद्वा अनुत्पन्नवस्तु विषयेच्छा आशा । उत्पन्नवस्तु प्राप्तीच्छा प्रतीक्षा "संगतम्" "सत्संगमं" "सूनृतां" सत्य-प्रियवाचं । इष्टापूर्ते इष्टं यागादि पूर्तं खातादि पुत्रान् पशूंश्च एतत् अनशन रूपं पापं "वृङ्क्ते" वर्जयति, नाश-

यतीत्यर्थः । वृजीवर्जने । रुधादित्वात् श्नम् । श्रजवनइत्यस्माद्धातोर्वाद्यादित्वाच्छपोलुक् ।

आशा âs'â (अनिर्ज्ञातप्राप्येष्टार्थप्रार्थना) hopes (प्राप्तवस्तुविषयेच्छा-ह्याशा)

प्रतीक्षे pratîkshe (निर्ज्ञातप्राप्यार्थप्रतीक्षणं) expectations. (अप्राप्त वस्तुविषयेच्छा).

संगतं samgatam (सत्संगमं तत्संयोगजं फलं) possessions (सुहृत्संगतिं) friends.

सुनृतां sunritâm (प्रिया वाक् तत् निमित्तंच) righteousness, (जनकर्तृक साधुवार्तां) good opinion of men.

च cha, and.

इष्टापूर्ते ishtâpurte (ishtam purtam. The lengthening of the vowel अ of ishta into आ ishtâ is by Pânini VI. 3 137. Ishta यजनं, यागजं, pûrtam आरामतटाकादि,) (fruit of) religious sacrifices (viz Deva-loka ; fruits of his) public charities (or secular liberality viz. Pitriloka.)

पुत्र-पशून् putra-pasun. Sons and cattle.

च cha and.

सर्वान् sarvân, all.

एतद् etad, this (अनशनरूपं पापं) the sin of fasting.

वृङ्क्ते vrinkte (from वृजी वर्जने श्नम् विकरणं ; वर्जयति, विनाशयति) destroys, deprives.

पुरुषस्य purushasya, of the person.

अल्प मेधसः alpa medhasah (अल्पबुद्धेः, अल्पप्रज्ञस्य) of small understanding, foolish.

यस्य yasya (यस्य गृहे) whose (house).

अनश्नन् anas'nan (अभुञ्जानः) without eating food or without experiencing.

वसति vasati, dwells.

ब्राह्मणः Brâhmaṉah A Brâhmin.

गृहे gṛihe, in the house.

In the house of what man of small understanding, a Brahmin dwells fasting, this (sin of non-feeding him) takes away all his hopes and expectations, good possessions and righteousness, the fruits of religious and charitable deeds, and sons and cattle.

MANTRA 9.

तिस्रोरात्रीर्यदवात्सीर्गृहे मे

ऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः ।

नमस्तेऽस्तु ब्रह्मन् स्वस्तिमेऽस्तु

तस्मात्प्रति त्रीन् वरान् वृणीष्व ॥ ९ ॥

अन्वयः—मे गृहे यत (यस्माद्हेतोः) हे ब्रह्मन् नमस्यः अतिथिः त्वं तिस्रो रात्रीः अवात्सीः, नमः ते अस्तु, स्वस्ति मे अस्तु, तस्माद्धेतोः त्रीन् वरान् प्रति (उद्दिश्य) वृणीष्व ॥

वृत्तिः—एवंवृद्धैरुक्तोमृत्युः नचिकेतसमुवाच (तिस्रोरा-त्रीर्यदवात्सीरिति) मेगृहे यस्माद् हेतोर्हे ब्रह्मन्न मस्कारार्हो ऽतिथिस्त्वं तिस्रोरात्रीरभुञ्जान एव अवात्सीरित्यर्थः (नमस्ते इति) स्पष्टोर्थः (तस्मादिति) तस्माद्धेतोर्मह्यंस्वस्ति यथास्यादित्येवमर्थं त्रीन् वरान् प्रति। उद्दिश्य वृणीष्व

प्रार्थय तव लिप्साभावेऽपि मदनुग्रहार्थमनशनरात्रिसमसंख्याकान् त्रीन् वरान् वृणीष्वेत्यर्थः ।

तिस्रः tisra*h*, three.

रात्रीः râtrî*h* (दिन त्रयं) nights, three days.

यत् yat (यस्मात्) as, because.

अवात्सीः or त् avâtsî*h* or°t (उषितवान् असि, वासम् अकार्षीत्) thou hast dwelt.

गृहे grihe, in house.

मे me (मम) my.

अनश्नन् anas'nan (अभुंजानः सन्) not eating.

ब्रह्मन् Brahman (हे ब्रह्मन्) O Brâhmana !

अतिथिः atithi*h* (सन्) a guest.

नमस्यः namasya*h* (नमस्कारार्हः, नमन योग्यः) venerable, worthy of salutation, honorable.

नमः nama*h*, salutation, hail.

ते te (तुभ्यं) to thee.

अस्तु astu (भवतु) let be.

ब्रह्मन् Brahman ! O Brahmana !

स्वस्ति svasti (भद्रं, मङ्गलं, an indeclinable), prosperity, welfare.

मे me (मह्यं) to me.

अस्तु astu, let be.

तस्मात् tasmât, therefore (because you dwelt without food three nights, and so I became guilty) or tasmât prati तस्य प्रतीकाराय "in order to remedy the evil effect of that."

प्रति prati, for each (night); or (प्रतीकाराय) in order to remedy.

त्रीन् trîn, three.

वरान् varân, boons (अभिप्रेतार्थ विशेषान्).

वृणीष्व vri*n*îshva (प्रार्थयस्व, संभजस्व, स्वीकुरु) ask, elect, choose, take for thyself.

Because in my house, O Brahmana! thou an honorable guest hast dwelt for three nights (without food), therefore let there be salutation to thee and peace to me; therefore three boons, one for each night, ask.

MANTRA 10.

शान्तसङ्कल्पः सुमना यथा स्याद्
वीतमन्युर्गौतमो माभि मृत्यो।
त्वत्प्रसृष्टं माभिवदेत् प्रतीत
एतत्त्रयाणां प्रथमं वरं वृणे ॥ १० ॥

अन्वयः—हे मृत्यो शान्तसंकल्पः सुमनाः वीतमन्युः गौतमः यथा मां अभि (प्रति) स्यात्; त्वत् प्रसृष्टं मा अभि (मां प्रति) प्रतीतः सन् वदेत्, एतद् त्रयाणां प्रथमं वरं वृणे ॥

वृत्तिः—एवं प्रार्थितो नचिकेतास्त्वाह (शान्तसंकल्प इति) हे मृत्यो मत्पुत्रो यमं प्राप्य किंकरिष्यतीति मद्विषयचिन्तारहितः प्रसन्नमनाः। मामभि मांप्रति मम पिता गौतमः वीतरोषश्च यथास्यादित्यर्थः। किंच (त्वत्प्रसृष्टमिति) त्वया गृहाय प्रेषितं मा अभि मां प्रति प्रतीतः, यथापूर्वं प्रीतः सन्वदेत्। यद्वाअभिवदेत्, आशिषं प्रयुञ्ज्यात्। अभिवदतिनाभिवादयत इतिस्मृतिषु अभिवदनस्य आशीर्वादेप्रयोगात् (एतदिति) स्पष्टोर्थः ॥

शान्त-संकल्पः sânta-sankalpa*h* (उपशान्तः संकल्पो यस्य मां प्रति or मदनिष्टे शान्तसंकल्पो यस्य) calm of thought; having no anxiety as regards me, *i.e.*, my father should be free from anxiety on my account—not troubled with the thought "how is my son faring in Yama's abode"; free from doubts (regarding my fate).

सुमनाः sumanâ*h* (प्रसन्नमनाः, शोभनमनस्कः) good-hearted, kind, pleased in mind.

यथा yathâ, so, as that.

स्यात् syât, he may be.

वीत-मन्युः vîta-manyu*h* (विगत रोषः, अपगतः कोपः) free from anger.

गौतमः Gautama*h* (मम पिता) Gautama (my father).

मा अभि mâ abhi (मां प्रति) towards me.

मृत्यो mrityo (हे मृत्यो) O Death!

त्वत्-प्रसृष्टं tvat-prasrishtam (त्वया विनिर्मुक्तं प्रेषितंगृहंप्रति, or त्वयाप्रेषितं) by thee discharged or permitted or sent back or dismissed (towards home).

मा mâ (माम्) me.

अभिवदेत् abhi-vadet (आशिषं प्रयुञ्ज्यात्) bless (me), greet. [or मा अभि = मां प्रति towards me, वदेत् he may speak, as one who recovered his memory].

प्रतीतः pratîta*h* (प्रत्यभिज्ञानवान्, लब्धस्मृतिः) assured in mind, remembering, assured of (soul-identity not thinking that the corpse has been obsessed by some elemental, and thus may not shun me, as people

ordinarily do in cases of persons recovering from death) R. यथा पूर्वं प्रीतः "with the old affection".

एतत् etat (प्रयोजनं) this. or (एतं)

त्रयाणां trayânâm, of the three.

प्रथमं prathamam, first (आद्यं)

वरं varam, boon.

वृणे vṛine (प्रार्थयेयं) I ask or choose.

O Death! so that my father Gautama be calm of thought, pleased in mind, free from anger towards me, and that he may greet me with old affection, when sent back by thee, this is the first of the boon I ask.

MANTRA 11.

यथा पुरस्ताद्भविता प्रतीत
औद्दालकिरारुणिर्मत्प्रसृष्टः ।
सुखꣳ रात्रीः शयिता वीतमन्युस्
त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ॥ ११ ॥

अन्वयः—यथा पुरस्तात् प्रतीतः भविता औद्दालकिः आरुणिः मत् प्रसृष्टः गतमन्युः (सन् उत्तरा अपि रात्रीन्) सुखंशयिता (सुखनिद्रां प्राप्स्यति,) मृत्युमुखात् प्रमुक्तं त्वां दर्शिवान् सन् ॥

वृत्तिः—एवमुक्तोमृत्युः प्रत्युवाच (यथापुरस्तादिति) यथापूर्वं त्वयि हृष्टो भविता। उद्दालक एव औद्दालकिः। अरुणस्यापत्यमारुणीः द्व्यामुष्यायणोवा उद्दालकस्यापत्यं। अरुणस्यगोत्रापत्यमितिवार्थः। मत्प्रसृष्टः, मदनुज्ञातः, मदनुगृहीतः सन्। मदनुग्रहादित्यर्थः। (सुखमिति) त्वयिगत

मन्युः सन् उत्तरा अपिरात्रीनूसुखंशयिता। लुट्। सुखनिद्रां-प्राप्स्यतीतियावत्॥ दर्शिवान् दृष्टवान् सन्नित्यर्थः। क्वसन्तोयं शब्दः। दृशेश्चेतिवक्तव्यमिति क्वसोरिट्। छन्दसो द्विवचनाभावः। मत्प्रसृष्टमिति द्वितीयान्तपाठेप्रेषितं त्वामिति योजना॥

यथा yathâ, as.

पुरस्तात् purastât (पूर्वम्, or ग्रामान्तरात् आगतः) before M. or a person coming back from sojourning in another city (पुरः-city.)

भविता bhavitâ (भविष्यति) will be.

प्रतीतः pratîtah (प्रतीतवान् सन्, पित्राप्रत्यभिज्ञातः) assured or recognised. R. with old affection.

औद्दालकिः Auddâlakih (उद्दालकस्य अपत्यं or उद्दालक एव) the son of Uddâlaka; or Uddâlaka.

आरुणिः Arunih (अरुणस्य अपत्यं or अरुणायाः) the son of Aruna or Arunâ (mother). Son of two fathers, according to Sankara. The son of the father called Uddâlaka and the mother called Arunâ, according to Madhva. R. Of the clan or Gotra of Aruna.

मत्-प्रसृष्टः mat-prasrishtah (मदनुग्रहात्, मया अनुज्ञातः or मत्-प्रेषितः भवान्) through my favor, or (when you will be) sent back by me.

सुखं sukham (प्रसन्न मनाः) peacefully, with tranquil mind.

रात्रीः râtrîh, nights.

शयिता sayitâ (स्वप्ता, शयानोभविता) will sleep.

वीत-मन्युः vîta-manyu*h*, free from anger

त्वां tvâm, thee.

ददृशिवान् dadṛisivân (दृष्टवान्) R reads दर्शिवान्, seeing, having seen.

मृत्यु-मुखात् mrityu-mukhât (मृत्यु गोचरात्, यममुखात्) from the mouth (or proximity) of Death.

प्रमुक्तं pra-muktam, freed fully.

As he was pleased with thee before, so with old affection Auddalaki Aruni will be (inclined towards thee). Through my favor, he will have pleasant sleep in (future) nights, free from anger towards thee, seeing thee freed from the mouth of death.

(You) being dismissed by me, will be recognised (by your father), as (a person returning home) from another city. The son of Uddâlaka will be free from anger, having seen thee freed fully from the jaws of death.

MANTRA 12.

स्वर्गे लोके न भयं किञ्चनास्ति
न तत्र त्वं न जरया बिभेति ।
उभे तीर्त्वाऽशनायापिपासे
शोकातिगो मोदते स्वर्गलोके ॥१२॥

अन्वयः—स्वर्गे लोके किंचन भयं नास्ति, हे मृत्यो यत्र त्वं न प्रभवसि । न जरया बिभेति ॥ उभे अशनाया-पिपासे तीर्त्वा, शोकातिगः स्वर्ग-लोके मोदते ॥

वृत्तिः—नचिकेता वरं द्वितीयं प्रार्थयते (स्वर्गेलोक इत्यादिनामन्त्रद्वयेन) अत्रस्वर्गशब्दो मोक्षस्थानपरः । यथाचेत-

तथोत्तरत्र वक्ष्यते । हे मृत्यो त्वं तत्र न प्रभवसि । जरायुक्तः सन् न बिभेति । जरातो न बिभेति। तत्र वर्तमानः पुरुष इति शेषः॥ (उभेइति) अशनाया बुभुक्षा । अत्रापि स्वर्गशब्दो-मोक्षस्थानपरः ।

स्वर्गे svarge (M. स्वर्गशब्दिते भगवल्लोके R. अत्र स्वर्ग शब्दो मोक्षस्थानपरः) In the heaven (the loka of Vishnu) R. Svarga is equivalent to Moksha here.

लोके . loke, world

न na, not

भयं bhayam, fear (from disease &c.)

किंचन kin chana (किंचिदपि M. किमपि) not the least,

अस्ति asti, is

तत्र tatra, there (the Heaven-World)

त्वं tvam (मृत्यो, M. त्वं च नासि, शिक्षकस्सन्) Thou (O Death, art not there because thou being the Teacher art on another plane.) R. प्रभवसि thou dost not rule there.

न na, not.

जरया jarayâ, by decay or on account of old age.

बिभेति bibheti, is afraid (M. तल्लोकगतः) *i.e.*, the inhabitant thereof.

उभे ubhe, both.

तीर्त्वा tîrtvâ (अतिक्रम्य) crossing over, leaving behind.

अशनाया-पिपासे asnâyâ-pipâse, hunger and thirst.

शोकातिगः sokâtigah (शोकं अतीत्य गच्छति, M. शोकामतिक्रान्तस्सन्) out of the reach of sorrow, being above sorrow, free from mental pain.

मोदते modate (हृष्यति, M. सुखमनुभवति) rejoices, experiences pleasure.

स्वर्ग-लोके svarga-loke (दिव्ये M. पुनरुक्तिरादरार्था) in the heaven world. (The repetition of the word "heaven-world," is either for the sake of showing honor to it; or to point out that this svarga-loka is not the Vishnu-loka, but the popular well-known swarga-loka, which lasts for a Manvantara).

In Heaven-world there is no fear. O Death, thou art not there and decay does not frighten. Crossing over both hunger and thirst, the sorrow-transcended rejoices in Heaven-world.

MANTRA 13.

स त्वमग्निꣳ स्वर्ग्यमध्येषि मृत्यो
प्रब्रूहि तꣳ श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त
एतद्द्वितीयेन वृणे वरेण ॥ १३ ॥

अन्वयः—हे मृत्यो स त्वं स्वर्ग्यं अग्निं अध्येषि, तं मह्यं श्रद्दधानाय प्रब्रूहि; स्वर्गलोकाः (परमपदप्राप्ताः) अमृतत्वं भजन्ते । एतद् द्वितीयेन वरेण वृणे ॥

वृत्तिः—(सत्वमिति) पुराणादिप्रसिद्धसार्वज्ञ्यत्वं स्वर्गप्रयोजनमग्निं जानासि। स्वर्गादिभ्यो यद्वक्तव्य इति प्रयोजनमित्यर्थयत् । स्थण्डिलरूपाग्नेः स्वर्गप्रयोजनकत्वंच उपासनाद्वारेति उत्तरत्रस्फुटम् । श्रद्दधानाय=मोक्षश्रद्धा-

वते। स्वर्गलोकेन तव किं सिध्यतीत्यत्राह, (स्वर्ग लोका इति) स्वर्गोलोकोयेषां ते। परमपदं प्राप्ता इत्यर्थः। परंज्योतिरूपसंपद्य स्वेनरूपेणाभिनिष्पद्यंत इति "देशविशेषविशिष्टब्रह्मप्राप्तिपूर्वकत्वात्स्वरूपाविर्भावलक्षणमोक्षशब्दिता मृतत्वस्येतिभावः" (एतदिति) स्पष्टम्॥

स sa, he (प्रसिद्धः) } i. e, your honour.
त्वं tvam, thou (मृत्युः) }

अग्निं agnim (M. अग्निनामकंहरिं) Fire: the God Hari under the designation of Agni.

स्वर्ग्यं svargyam (स्वर्गलोकस्य प्राप्तिसाधनंभूतं, M. स्वर्ग-साधनं) that leads to heaven, which is the means of attaining heaven. R. स्वर्ग प्रयोजनं that whose purpose is Heaven. The affix य is added by the Vârtika to Panini V. I. 111.

अध्येषि adhyeshi (स्मरसि, जानासि) thou rememberest, knowest.

मृत्यो mrityo (हे मृत्यो) O Death!

प्र-ब्रूहि pra-brûhi (कथय) tell, fully speak.

तं tam, that or this (the Fire on the altar which is called Hari.)

श्रद्दधानाय sraddadhânâya (श्रद्धावते) to the faith-ful. R. To me who desires moksha.

मह्यम् mahyam (स्वर्गार्थिने) to me (who desires heaven. M. Not merely because it leads to heaven, that this Fire-sacrifice should be learnt; but because it further leads to Mukti also, as follows).

स्वर्गलोकाः swarga-lokâh (स्वर्गो लोको येषां ते परंपदप्राप्ताः) the heaven-world-dwellers. M. Those who live for

one Manvantara in the Svarga world, and obtain afterwards Mukti there) R. Those who have reached the highest state aud have attained the form of Highest Luminousity—the true form of Self.

अमृतत्वं amṛitatvam (अमरणतां, देवत्वं; M. मुक्तिं) immortality, Deva-hood, Mukti or liberation. R. The state preliminary to Brahm-attainment, the state of having the same form as Vishnu.

भजंते bhajante (प्राप्नुवन्ति) reach, attain.

एतद् etad, (अग्नि विज्ञानं, एतं) this (science of Fire.)

द्वितीयेन dvitîyena, (M. द्वितीयं) by the second, or second.

वृणे vṛine (प्रार्थये) I choose, I ask.

वरेण varena (M. (वरं) by the boon.

O Death ! thou verily knowest the Heavenly Fire ; teach that to me who have faith. The dwellers of Heaven world enjoy immortality. This through the second boon I choose.

MANTRA 14.

प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेतन्निहितं गुहायाम् ॥ १४ ॥

अन्वयः—ते प्रब्रवीमि, तद् उ मे (मम उपदेशात) निबोध ॥ हे नचिकेतः स्वर्ग्यं अग्निं प्रजानन् (त्वं) अनन्तलोकाप्तिं अथः प्रतिष्टां (लभस्व) ॥ एतं गुहायां निहितं त्वं विद्धि ॥

वृत्तिः—एवमुक्तो मृत्युराह (प्रतेब्रवीमीति) प्रार्थितवते तुभ्यं प्रब्रवीमि । व्यवहिताश्चेति व्यवहितप्रयोगः । मम

उपदेशाज्जानीहीत्यर्थः । ज्ञानस्य फलं दर्शयति । (स्वर्ग्यम-ग्निमिति) अनन्तस्य विष्णोर्लोकस्तत्प्राप्तिम् । तद्विष्णोः परमंपदमित्युत्तरत्रवक्ष्यमाणत्वात् । अथो तत्प्राप्त्यनन्तरं-प्रतिष्ठां अपुनरावृत्तिं च लभत इति शेषः । तद् ज्ञानस्येदृश-सामर्थ्यं कथं सम्भवतीति मन्यमानं प्रत्याह (विद्धीति) ब्रह्मोपासनाङ्गतया एतद् ज्ञानस्य मोक्षहेतुत्वलक्षणमेतत्स्व-रूपं गुहायां निहितमन्ये न जानन्ति । त्वं जानीहीतिभावः । यद्वा ज्ञानार्थस्य विधेलाभार्थकत्व सम्भवात् । अग्निं प्रजानं स्त्वम् । अनन्तलोकाप्तिंप्रतिष्ठां लभस्वेत्युक्ते हेतुहेतुमद्भावः सिद्धो भवति । प्रजानन् । लक्षणहेत्वोरिति शतृप्रत्ययः ॥

प्र pra, (an upasarga, qualifying ब्रवीमि. Placed out of context as a Vaidika form).

ते te (तुभ्यं) to thee.

ब्रवीमि bravîmi (प्रवच्मि) I tell : explain.

तद् tad, that.

उ u, (यत्) which (M. एव) alone (thou hast asked)

मे me, (ममवचसा M. मत् सकाशात) from me or from my (words).

निबोध (बुध्यस्व एकाग्रमनाः सन् M. जानीहि) understand (with concentrated mind), know, learn.

स्वर्ग्यम् svargyam, (स्वर्गायहितं, स्वर्गसाधनं) heavenly, leading to heaven.

अग्निम् agnim (M. चितस्थं अग्निनामकं हरिं) Agni, or the God Hari.

नचिकेतः Nachiketa*h* (हे नचिकेतस्) O Nachiketa !

प्रजानन् prajânan, (विज्ञातवान् अहं सन्) (I) knowing R. Thou knowing (this fire, wilt reach endless worlds).

अनन्त-लोकाप्तिं ananta-lokâptim, (स्वर्गलोकफलप्राप्तिसाधनम् M. अनन्तस्य विष्णोर्लोकस्याप्तिम् आप्तिसाधनं) the means for the attainment of the un-ending world or the Heaven-world: or the world of Vishnu. Lit. Infinite world-attainment.

अथो atho, (अपि; M. किंच) also, moreover. R. after reaching the Heaven-world.

प्रतिष्ठाम् pratishṭhâm, (आश्रयं जगतो विराड्रूपेण तमग्निं, M. सर्वलोकप्रतिष्ठाहेतुं) support (of worlds in the form of Virâṭ); the cause of the maintenance of all worlds. R. अपुनरावृत्तिं च लभते Non-return to Samsâra: fixity.

विद्धि viddhi, (जानीहि) know.

त्वम् tvam, thou

एतं etam, this (fire)

निहितं nihitam (स्थितं M. नितरां स्थितं) placed, completely placed, M. M. hidden.

गुहायां guhâyâm, (विदुषां बुद्धौ M. सर्वप्राणिहृदयगुहायां) in the cavity, in the Buddhi of the Wise, in the cavity of the heart of all creatures. M. M. in darkness.

I tell thee, that verily from me learn thou. O Nachiketa*h* knowing this Heavenly Fire, which leads to the eternal world, (get thou) then fixity. Know thou it to be placed in the cavity.

MANTRA 15.

लोकादिमग्निन्तमुवाच तस्मै
याइष्टका यावतीर्वा यथा वा ।
स चापि तत्प्रत्यवदद् यथोक्त-
मथास्य मृत्युः पुनरेवाह तुष्टः ॥ १५ ॥

अन्वयः—तं लोकादिं अग्निं तस्मै उवाच ॥ याः इष्टकाः यावतीः वा यथा वा स च अपि तत् यथोक्तम् प्रत्यवदत् ॥ अथ अस्य (शिष्यस्य ग्रहणसामर्थ्यदर्शनेन) सन्तुष्टः (सन्) मृत्युः पुनर् एव आह ॥

वृत्तिः—अनन्तरं श्रुतिवाक्यं (लोकादिमग्निमिति) लोकस्यादिं हेतुं स्वर्ग्यमितियावत् । तमग्निमुवाच । यल्लक्षणा इष्टकाश्चेतव्याः । यत्सङ्ख्याकाः । येन प्रकारेण चेतव्याः । तत्सर्वमुक्तवानित्यर्थः । यावतीरिति । पूर्वसवर्णश्छान्दसः । (सचापीति) सच नचिकेताः तत् । श्रुतं सर्वं तथैवानूदितवानित्यर्थः (अथास्येति) शिष्यस्यग्रहणसामर्थ्यदर्शनेन संतुष्टः सन् मृत्युः पुनरप्युक्तवान् ॥

लोकादिं lokâdim (लोकानाम् आदिं प्रथमशरीरित्वाद् M. सर्वलोकानाम् आदिम् कारणभूतं) the world beginning, MM the beginning of all the worlds (because of its being the first embodied), or the beginning of all worlds, as being their cause, R. The cause of the worlds.

अग्निं agnim. The fire or Hari.

तम् tam (प्रकृतं नचिकेतसा प्रार्थितं M. चितिस्थं अग्निनामकं हरिं) that (fire about which Nachiketa had questioned) or Hari who is in the heart and called Agni.

उवाच uvâcha (उक्तवान् मृत्युः) he (Yama) said.

तस्मै tasmai (नचिकेतसे) to him (Nachiketa).

याः Yâh, what.

इष्टकाः ishṭakâ*h* (चेतव्याः स्वरूपेण M. देवताः) bricks (to be put in forming the altar); M. or Devatas (to be invoked).

यावतीः Yâvatî*h* (संख्याया M. यावत् संख्याकाः) how many (in number: *i. e.*, 360.)

वा vâ or, and

यथा वा Yathâ vâ (चीयतेऽग्निर्येन प्रकारेण M. यादृशपरिमाणवा) and how (they are to be placed) or how (much they should be in quantity).

स sa, He (Nachiketas)

च cha, and

अपि api, also

तत् tat, that (which was told by Yama).

प्रत्यवदत् praty-avadat (प्रत्ययेन अवदत् प्रत्युच्चारितवान् M. अनूदितवान्) uttered again, repeated.

यथोक्तम् Yatha-uktam (यत्नेन) as it had been told (to him by Yama)

अथ atha (तस्य प्रत्युच्चारणेन M. अनुवादानन्तरं) then (because of his aptness in repeating it, or after the repetition).

अस्य asya (नचिकेतसः) (pleased) with him (Nachiketas)

मृत्युः mrityu*h* (यमः) The Death or Yama

पुनरेव आह punar eva âha, again then said (in order to give another boon over and above the three.)

तुष्टः tushṭa*h*, M. (संतुष्टः) pleased.

He told him that Universe-cause Fire, what bricks, and how many, and how. He also, repeated that as told. Then Death being pleased with him again said (to him).

MANTRA 16.

तमब्रवीत्प्रीयमाणो महात्मा
वरन्तवेहाद्य ददामि भूयः।
तवैव नाम्ना भविताऽयमग्निः
सृङ्काञ्चेमामनेकरूपाङ् गृहाण ॥ १६ ॥

अन्वयः—प्रीयमाणः महात्मा (मृत्युः) तं (नचिकेतसं) अब्रवीत् । भूयः तव (तुभ्यं) वरं अद्य इह ददामि । तव एव नाम्ना अयं अग्निः (प्रसिद्धः) भविता । इमाम् अनेकरूपाम् सृङ्काम् गृहाण ॥

वृत्तिः—(तमब्रवीदिति) सन्तुष्य महामना मृत्युः नचिकेतसमब्रवीत् । पुनश्चतुर्थं वरं ददानि । प्रयच्छामीति । किं तत् । तत्राह (तवैवेति) मयोच्यमानोऽग्निस्तवैवनाम्ना नाचिकेत इति प्रसिद्धो भविता । विचित्रां सृङ्कां शब्दवतीं रत्नमालां स्वीकुर्वित्यर्थः ।

तम् tam (नचिकेतसं) to him (Nachiketas.)

अब्रवीत् abravît, (he) said.

प्रीयमाणः prîyamânah (प्रीतिमनुभवन् M. प्रीतिमान् सन् सन्तुष्य) pleased, M. M. being satisfied (at finding him an apt pupil) R. Being satisfied.

महात्मा Mahâtmâ (अक्षुद्रबुद्धिः M. महामनाः) the Great Souled, M. M. the generous : the high-minded.

वरं varam (चतुर्थं) a (fourth) boon. M. त्वयादन्यं

तव tava (तुभ्यं) to thee.

इह iha (प्रीतिनिमित्तं M. चितिविषये) here (because I am pleased with thee) or here (relating to the Fire altar).

अद्य adya (इदानीं) today, now.

ददामि dadâmi (प्रयच्छामि) I give R. ददानि "Let me give."

भूयः bhûyah (पुनः) another (other than the three.)

तव tava (नचिकेतसः) thy (Nachiketa)

एव eva, alone.

नाम्ना nâmnâ (अभिधानेन M. नाचिकेताग्निरित्येवंरूपेण) by name (known or called after thy name, as Nâchiketâgni).

भविता bhavitâ (भविष्यति) will be (famous) or M. भवतु let it be.

अयम् ayam, this (whose bricks &c. have been detailed above.)

अग्निः agnih, (इष्टकाचितरूपोऽग्निः) fire.

सृङ्कां sṛinkâm (शब्दवतीं रत्नवतीं मालां, M. कण्ठमालां) garland, tinkling jewelled neck-lace : chain or अकुत्सितां गतिं कर्ममयीम् (this honoured) Path (the Path of karma.)

च cha, and

इमाम् imâm, this.

अनेकरूपाम् anekarûpâm (विचित्रां M. बहु रूपां स्वर्णमयीं) of many colours, wonderful, variegated. M. golden. Multi-form.

गृहाण grihanâ (स्वीकुरु) take, accept.

Being pleased, the high-minded Death spoke to him :— " Let me give thee here another boon to-day. By thy name alone this fire will be (known among men.) Accept this multiform Path (of Karma.")

MANTRA 17.

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत्तरति जन्ममृत्यू ।
ब्रह्मजज्ञन्देवमीड्यं विदित्वा
निचाय्येमाᳫं शान्तिमत्यन्तमेति ॥ १७ ॥

अन्वयः—त्रिनाचिकेतः त्रिकर्मकृत् त्रिभिः सन्धिम् एत्य जन्ममृत्यू तरति । ब्रह्मजज्ञं देवं ईड्यम् विदित्वा इमाम् निचाय्य अत्यन्तं शान्तिं एति ॥

वृत्तिः—पुनरपि (त्रिणाचिकेत इति) त्रिणाचिकेतः । अयंवावयः पवत इत्याद्यनुवाकत्रयाध्यायी । त्रिकर्मकृत्= यजनाध्ययनदानकृत्, पाकयज्ञहविर्यज्ञसोमयज्ञकृद्वा ॥ त्रिभिः=त्रिरनुष्ठितैरग्निभिः । सन्धिं परमात्मोपासनेनसम्ब-

न्धम् । एत्य प्राप्य जन्ममृत्युतरतीत्यर्थः। करोतितद्येनपुन र्नजायत इत्यनेनैकार्थ्यात् । एवमेवच्चयंमन्त्रः । त्रयाणामेव चेवमिति सूत्रेभाष्ये ॥ त्रिभिरित्यसन्धिमिति निर्दिष्टमंगीभूतं परमात्मोपासनमाह (ब्रह्मज मिति) अयंमन्त्रः। विशेषणाच्चे- तिसूत्रभाष्ये । ब्रह्मजः जीवः ब्रह्मणोजातत्वात्, ब्रह्मजज्ञं= जीवज्ञं, तंदेवमीड्यं विदित्वा जीवात्मानमुपासकं ब्रह्मात्म- कत्वेना वगम्येत्यर्थः। इति विवृतम् । देवशब्दस्य परमात्म- वाचितया जीवपरयोश्चैक्या सम्भवात् । अत्रदेवशब्दस्य परमात्मात्मकत्व पर्यन्तोर्थ इति भाष्याभिप्रायः ॥ निचाय्य ब्रह्मात्मकं स्वात्मानं साक्षात्कृत्य । इमाम् । त्रिकर्मकृत्त- रतीतिपूर्वमन्त्रनिर्दिष्टां संसाररूपानर्थशान्तिमेतीत्यर्थः ॥

त्रिणाचिकेतः Tri-nâchiketa*h*. (त्रिकृत्वो नाचिकेतोऽग्निश्चितोयेन स or तद् विज्ञानस्तदध्ययनस्त दनुष्ठानवान् ॥ M. नचिकेतसोयं नाचिकेतः ॥ "नाचिकेतसः" इति वक्तव्ये छान्दसः सलोपः ।। त्रयोनाचिकेता- यस्य असौ-त्रिनाचिकेतः ॥ त्रिवारानुष्ठित नाचिकेतनामाग्निचयनः पुमान्) He who has performed *thrice* the Nachiketas fire-sacrifice ; or he who is its thrice master—*i. e.*, who *knows*, who *studies* and who *practises* this sacrifice. M. The proper grammatical from is Nachiketasah ; the elision of स is a Vedic irregularity. He who has *thrice* performed this fire- sacrifice.

त्रिभिः tribhi*h*. (मातृपित्राचार्यैः M. वेदैः) with the three (father, mother and teacher), or M. with the three (Vedas or the Vedas, Rik, Yajush and

Saman, or the Vedas, the Smritis and the Shishtachara. (the customs of the good men) and also the three proofs *i. e.*, Direct Perception, Inference and Revelation. R. With the three Fires.

एत्य (प्राप्य) having obtained.

संधिम् Sandhim (संधानं, संबन्धं, मात्रादि अनुशासनं यथावद् प्राप्य M. वेदत्रयाविरुद्धोवर्तते, वेदत्रयोक्तमार्गेण भगवन् तत्वादिकं जानन्) union, (the Eternal Triad) relationship *i.e.*, he who has been properly taught and brought up by his father, moth-r and teacher : M. He who follows the three Vedas and knows the three Principles (God, the Jiva, and the Matter) as taught in the three Vedas.

त्रिकर्मकृत् tri-karma-krit (इज्याध्ययनदानानां कर्ता M. यज्ञ दानतपः कर्ता) three-duty-done. M. *i. e.*, who has performed the three duties *i. e.*, sacrifice, study (or austerity) and alms-giving R. who has performed the three sacrifices called Pâka yajna, Havir yajna and Soma yajna.

तरति tarati (अतिक्रामति M. मुक्तोभवति passes over, crosses over—becomes free from ; MM over comes.

जन्म मृत्यू Janma mrityû, birth and death.

ब्रह्मजज्ञं Brahma-ja-jnam (ब्रह्मणो हिरण्यगर्भाज् जातः = ब्रह्मजः ॥ ब्रह्मजश्च असौ ज्ञश्च = ब्रह्मजज्ञः ॥ सर्वज्ञः M. ब्रह्म = वेदः ॥ तत्र व्यक्तत्वाद् ब्रह्मजः = विष्णुः ॥ जानाति इति ज्ञः = सर्वज्ञः) the Brahmâ—born and omniscient. The All-knowing child of Hiranygarbha. M. The Veda-revealed-all-knower *i.e.* the omniscient Vishnu. M.M. Fire which knows (or makes us

know) all that is born of Brahman. R. Brahma-born is the Jîva. He who knows or rules the Brahma-born is Ishvara.

देवं devam (द्योतनाज्ज्ञानादिगुणवन्तं M. क्रीडादिगुणविशिष्टं) God (because he illumines all, knows all, or because he sports in all, the whole universe is whose play-ground), divine. R. The supreme self, the God.

ईड्यम् î*d*yam (स्तुत्यं) worshipped, praised (by Brahmâ &c.) M. M. venerable. R. should be adored.

विदित्वा viditvâ (शास्त्रतः M. साक्षात्कृत्य) having known (through scriptures) or directly realised. M.M. learnt. R. Having known that the jîvatmâ is the worshipper and the God the worshipped,

निचाय्य nichâyya (दृष्ट्वा च आत्मभावेन M. विचार्य) R. Having *realised*, discriminated, having seen (as identical with one's self); having reflected over. M.M. understood. G. T. seven hundred and twenty is the number of ishtakas in a year, during the morning and evening sacrifice. One should meditate thus "I am that Fire worshipped daily, morning and evening." R. Having realised his self as part of Brahm, or indwelt of Brahm, or animated by Him.

इमाम् imâm (स्वबुद्धि प्रत्यक्षां, बुद्धिरुपासनातया साक्षात् कृतां M. वेदादि उक्तां पूर्वोक्तरजन्ममृत्यूत्तरणरूपां) this (realised in one's Buddhi; realised through the meditation in Buddhi;) or M. this (taught in the vedas &c.)

शान्तिं *sântim* (उपरति) peace.

अत्यन्तं atyantam (अतिशयेन) M.M. everlasting, extreme.

एति eti (प्राप्नोति) goes to, attains, obtains (the status of a Virâj by uniting knowledge (jnâna) with karma).

The performer of three Nachiketas sacrifice, the performer of three karmas, having attained union with the three, crosses over birth and death. Having (more over) known (that) the Ishwara should be worshipped (by the jîva), because He rules (this jiva) the child of Brahmâ, and having realised (his self as part of Brahm) he attains this extreme peace.

MANTRA 18.

त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वांश्चिनुते नाचिकेतम् । स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥ १८ ॥

अन्वयः —यः त्रिनाचिकेतः विद्वान् एतद् त्रयं विदित्वा एवं नाचिकेतं चिनुते, स पुरतः मृत्युपाशान् प्रणोद्य शोकातिगः स्वर्गलोके मोदते ॥

वृत्तिः—(त्रिणाचिकेत इति) त्रिणाचिकेतः उक्तार्थः । त्रयमेतद्विदित्वा । ब्रह्मजज्ञंदेवमीड्यमितिमन्त्रनिर्दिष्टं ब्रह्मस्वरूपं तदात्मकस्वात्मस्वरूपं । त्रिभिरेत्य सन्धिमिति निर्दिष्टाग्नि स्वरूपं च विदित्वा गुरूपदेशेन शास्त्रतोवा य एवं विद्वान् । एतादृशार्थत्रयानुसन्धानपूर्वकं नाचिकेतमग्निं यश्चिनुते । सः मृत्युपाशान् । रागद्वेषादिलक्षणान

पुरतः शरीरपातात्पूर्व्वमेवप्रणोद्य तिरस्कृत्य। जीवद्दशायामेवरागादिरहितः सन्नित्यर्थः (शोकातिगो मोदते स्वर्गलोके इति) पूर्व्वमेवव्याख्यातम्॥

वृत्तिः—यः एतां चितिं ब्रह्मात्मभूतां विदित्वा ब्रह्मात्मकस्यस्वरूपतयाऽनुसन्धायनाचिकेतमग्निं चिनुते। स एव ब्रह्मात्मकस्वात्मानु सन्धानशालीसन् अपुनर्भवहेतुभूतं यद्भगवदुपासनम्। तदनुतिष्ठति। तत्श्चाग्नौभगवदात्मकस्वात्मानुसन्धानपूर्वकमेवचयनम्। त्रिभिरेत्यसन्धिं त्रिकर्मकृत्तरतिजन्ममृत्यू इति पूर्वमन्त्रेभगवदुपासनद्वारामोक्षसाधनतया निर्दिष्टत्वात्। नान्यदिति भावः। अयच मंत्रः केषुचित्कोशेषुनदृष्टः। कैश्चिद्व्याकृतश्च। अथापि आचार्यादिभिरेव व्याख्यातत्वान्नप्रक्षेपशंका कार्या॥

त्रिणाचिकेतस् Trinâchiketas. The Tri-Nâchiketa M M He who knows the three Nâchiketa fires (M. त्रिवारं नाचिकेताग्निमनुतिष्ठन्) He who has thrice performed the Nachiketa fire-sacrifice.

त्रयम् trayam (यथोक्तं या इष्टका यावतीर्वा यथा वा M. या इष्टका इत्यादिनोक्तं विष्णुरूपेष्टकादेवता इष्टकासंख्या इष्टकापरिमाण रूपं त्रयं) the three (the bricks, their number, and arrangement. M. the nature of Devatas, their number, and attribute.) R. The three *i.e.* the essential nature of Brahm ; the esential nature of one's Self; and the Heavenly Fire.

एतद् etad, this.

विदित्वा viditvâ (अवगम्य) having known (R. through being taught by a Guru or through scriptures.)

यः yah : who.

एवं evam (आत्मरूपेण M. ज्ञातप्रकारेण) thus (by identifying the Fire with the Self) or (by knowing it thus). R. with the above three-fold knowledge of God, Jîva and Fire.

विद्वान् vidvân, the wise.

चिनुते chinute (निर्वर्तयति) accomplishes M.M. piles up.

नाचिकेतं nâchiketam. The Nâchiketa dhyana (or mode of contemplation) (M. who makes the Fire-altar in the shape of a falcon, tortoise &c. with the bricks).

स sa, he.

मृत्युपाशान् mrityu-pâsân (अधर्म-अज्ञान-राग-द्वेषादि लक्षणान् M. यमपाशान्) the death-ropes (or lassoos). M.M. chains of death (in the shape of sin, ignorance, attraction and repulsion).

पुरतः puratah, (अग्रतः, पूर्वमेवशरीरपातात् M. पुरस्थितान्) from before, first, before the falling off of the body or the passions &c.; placed in front (or in the heart).

प्रणोद्यः pranodyah, (अपहाय M. प्रणुद्य, निरस्य) thrown off, shaken off.

शोकातिगः sokâtigah (मानसैर्दुःखैर्वर्जितः M. शोकान् अतिक्रान्तः) passed over sorrow M.M. beyond the reach of grief. See verse 12.

मोदते modate (सुखं अनुभवति) rejoices.

स्वर्गलोके svarga-loke (वैराजे, विराडात्मस्वरूपप्रतिपत्त्या M. हरिलोके) in the Heaven-world (the world of Virâj or Hari).

That wise Three-fold-performer of Nachiketas sacrifice, who having known these three, thus raises the Nachiketas fire, he having thrown off the toils of death, lurking in the heart, sorrow—transcended rejoices in the Heaven-world.

MANTRA 19.

एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण। एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरन्नचिकेतो वृणीष्व ॥ १९ ॥

अन्वयः—(हे) नचिकेतः ! ते एषःस्वर्ग्यः अग्निः (उपदिष्टः) यं द्वितीयेन वरेण अवृणीथा ॥ जनासः (जनाः) तव एव नाम्ना एतं अग्निं प्रवक्ष्यन्ति नचिकेतः ! तृतीयम् वरं वृणीष्व ॥

वृत्तिः—(एषतेऽग्निर्नचिकेतः स्वर्ग्यः) उपदिष्ट इतिशेषः (यमवृणीथाद्वितीयेनवरेण) स्पष्टोर्थः। किंच (एतमग्निमिति) जनास्तवैवनाम्ना एतमग्निं प्रवक्ष्यन्तीत्यर्थः। (तृतीयमित्यादि) स्पष्टोर्थः।

एषः eshah, this.

ते te (तुभ्यं) to thee M.M. thy. (M. कथित इति योज्यं) "Has been said"—should be supplied.

अग्निः agnih (वरः) fire (other boon.)

नचिकेतः Nachiketah (हे नचिकेतः) O Nachiketah !

स्वर्ग्यः Svargyah (स्वर्गसाधनं) heavenly, means of reaching svarga.

यम्	yam (अग्निं) which (fire.)
अवृणीथाः	avrinîthâh (प्रार्थितवान् असि M. वृतवान् असि) then didst ask or choose.
द्वितीयेन	dvitîyena (M. द्वितीयं) by the second.
वरेण	varena (M. वरं) gift, boon.
एतम्	etam, this.
अग्निम्	agnim, fire.
तव	tava, thy (त्वत्संबधिनमेव) *i.e.* by thy name alone.
एव	eva, only.
प्रवक्ष्यन्ति	pravakshyanti (प्रवदिष्यन्ति) will call or M.M. proclaim.
जनासः	janâsah (जनाः, आज् जसेरसुक्) people. This is an archaic form of plural.
तृतीयं	tritîyam, third.
वरं	varam, boon.
नचिकेतः	nachiketáh, O Nachiketâh.
वृणीष्व	vrinîhshva, ask. Choose.

O Nachiketas! to thee this Heavenly Fire has been taught, which thou didst ask by thy second boon. The people will call this Fire by thy name alone. O Nachiketas ask the third boon.

MANTRA 20.

येयम्प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥ २० ॥

अन्वयः—प्रेते मनुष्ये या इयम् विचिकित्सा एके अस्ति इति, एके च न अयम् अस्ति इति (कथयन्ति); त्वया अनुशिष्टः एतत् विद्याम् (विजानीयाम्); वराणाम् एषः तृतीयः वरः ॥

वृत्तिः—प्रकृतमनुसरामः नचिकेता आह (येयंप्रेत इति) अत्ताचराचरग्रहणादित्यधिकरणे इमं मन्त्रं प्रस्तुत्येत्थंहि भगवताभाष्यकृता । अत्रपरमपुरुषार्थ रूपब्रह्मप्राप्तिलक्षण मोक्ष याथात्म्यविज्ञानायतदुपायभूत परमात्मोपासनपरावरात्मतत्वजिज्ञासया अयं प्रश्नः क्रियते । एवं च येयं प्रेत इति न शरीरमात्रवियोगाभिप्रायम् । अपितु सर्वबन्धविनिर्मोक्षाभिप्रायम् ।

या yâ (सर्वसाधारणा) that which (well-known)

इयम् iyam, this

प्रेते prete (मृते मनुष्ये ; M. मृतपुरुषे मुक्ते च मनुष्ये) *about the dead* M. The wise say that the God rules even the "dead" *i. e.*, the men who have become fully liberated ; the unwise say the "liberated" are not under God's control. R. *Going off*, departing, *i. e.*, the falling off of all bondages, *i. e.*, *in the state of Moksha, about the liberated.*

विचिकित्सा vichikitsâ (संशयः M. सन्देहः) doubt. Enquiry.

मनुष्ये manushye, among men (मुक्ते च मनुष्ये) about (the liberated) men. "Man" includes all living beings.

अस्तिइति एके asti iti eke. "Is" say one. S. There is an *Atma*, beyond the body, the senses, the Manas and the Buddhi—(above the physical, astral, mental and Buddhic planes). M. Some wise one say that there is a *God* who rules and

controls the souls of the dead persons and of those who are liberated.

न अयम् अस्ति इति च एके na ayam asti iti cha eke "and it is not" (say) the others. S. There is no such separate entity as the Atmâ besides the above four. M. That God is not the ruler of souls.

एतद् etad. This (doubt or knowledge) M. (विचिकित्साविषयं, मृत मुक्तजीवयोः प्रेरकस्वरूपं) M. This subject of doubt regarding the director of the dead and liberated souls.

विद्याम् vidyam (विजानीयाम्)—I may know

अनुशिष्टः anusishtah (ज्ञापितः M. उपादेष्टस् सन्) taught, informed, instructed.

त्वया tvayâ, by thee.

अहं aham, I.

वराणां varanâm, among the boons.

एषः eshah, this (boon, this teaching or instruction about the dead and liberated.)

वरः varah, boon. Madhva's reading is वृतं "chosen."

तृतीयः tritîyah (अवशिष्टः) third.

There is this doubt, when a man dies, some say that the soul exists, others that it does not. May I know this being taught by thee. Among the boons this is the third.

M. Over the dead and the (liberated) men, some say that there is (a God who controls); others say that He is not. (Therefore) this doubt (has arisen in my mind). May I know this being taught by thee: of the boons, this is the third.

R. There is this doubt regarding (the condition of the) man in moksha, some say there is (still an Individual self or form or centre in Moksha) other say it is not. May I learn, being taught by thee, this (true nature of Moksha). Of the boons this is the third.

MANTRA 21.

देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्म्मः। अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम् ॥ २१ ॥

अन्वयः—अत्र देवैः अपि पुरा विचिकित्सितं, हि न सुविज्ञेयं, एषः धर्मः अणुः। (हे) नचिकेतः अन्यं वरं वृणीष्व ॥ मा मा उपरोत्सीः। मा (मां) एनं अतिसृज ॥

वृत्ति—एवं मुक्तस्य रूपं पृष्टो मृत्यु रुपदिश्यमानार्थस्य अतिगहनतयापारं प्राप्तुमप्रभवते मध्येपतयाशवेनोपदेष्टव्य-मिति मत्वाह (देवैरत्रापीति) बहुदर्शिभिरपि देवैरस्मि-न्मुक्तात्मस्य रूपेविचिकित्सितम् । संशयतम् । (नहीति) आत्मतत्वं ननुज्ञानमितिसूक्ष्मोधर्मः । समान्यतो धर्मएवदु-र्ज्ञानः । तत्राप्ययंदुर्ज्ञान इति भावः (अन्यंवरमिति) स्पष्टोऽर्थः (मांमोपरोत्सीरिति) मामा इति निषेधेवीप्सीयां द्विर्वचनम् । उपरोधं माकार्षीः । एवं मामतिसृ जमुञ्च ।

देवैः Devaih. By the Gods (बहुदर्शिभिः) by the sages who look into the far.

अत्र atra (एतस्मिन् वस्तुनि त्वत् कृत प्रश्नविषये) here (with regard to this matter, the subject of thy ques-

tion). R. मुक्तात्मस्वरूपे Regarding the form of the liberated self or Mukti.

अपि api, also.

विचिकित्सितं vichikitsitam (संशयितं M. संदिग्धम्) doubtful, undecided.

पुरा purâ (पूर्वं) before.

न na, not

हि hi, verily or (यतः) because.

सुज्ञेयम् sujneyam or सुज्ञे यः (सुष्ठु ज्ञेयं श्रुतमपि प्राकृतैर्जनैः सुखेन ज्ञेयः) well-understood or easily understood.

अणुः anuh (सूक्ष्मः M. अव्यक्त स्वभावः) atomic, subtle. unmanifested nature.

एष esha, this (relating to Atmâ)

धर्मः dharmah (M धारकत्वाद् धर्मः = भगवान्) nature, or Lord (because he upholds or is Dhâraka of all, therefore He is called Dharma).

अन्यं anyam (असंदिग्धफलं प्रेतनियामकोपदेशवरात्. अन्य) other

वरं varam, boon.

नचिकेतः nachiketas, O Nachiketas

वृणीष्व varnîshva, choose,

मा mâ (मां) me R. The two मा both denote negation in a strong and double form, do not press, *ie.* do not press, do not press.

मा ma, not.

उपरोत्सीः uparotsîh (उपरोधं मा कार्षीः) (do not) press (as the creditor presses the debtor to discharge the promise).

अति ati, an upasarga to be connected with सृज

मा mâ (मां प्रति) to me, not. M.

सृज srija or अति-सृज (विमुञ्च एनं वरं) let go (this boon)

एनम् enam (वरं) this boon. According to Madhva the phrase अति &c. is the reply of Nachiketas. He explains मातिसृजैव mâtisrijaivam = एवं (उक्त प्रकारेण) thus (in the above mentioned method) मा अतिसृज (अतिसर्जनं परित्यागं मा कार्षीः) do not resile or go back (on thy promise O Death).

About this by the Devas, even of ore there was a doubt; because it is not easy of understanding. This nature is subtle. O Nachiketas! ask another boon, do not press me; let go to me this (boon).

M. This (question) was left undecided even by the gods of old, because it is not of easy comprehension. This God is subtle (of unmanifested nature). O Nachiketas! ask any other boon. Do not press me. Free me from this (pledge of answering thee.)

MANTRA 22.

देवैरत्रापि विचिकित्सितं किल त्वञ्च मृत्यो यन्न सुवि-ज्ञेयमात्थ । वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् ॥ २२ ॥

अन्वयः —(नाचिकेताः उवाच) । मृत्यो ! अत्र किल निश्चितं पुरा देवैः अपि विचिकित्सितं, यत् त्वं च न सुविज्ञेयम् आत्थ (कथयसि) अस्य (तत्वस्य) वक्ता च त्वादृक् (त्वत्सदृशः) अन्यः न लभ्यः, (अतः) एतस्य तुल्यः अन्यः कश्चित् वरः न (अस्ति इति मन्ये) ॥

वृत्तिः- एवमुक्तो नचिकेता आह (देवैरत्रापिविचिकित्सितं किलेति) स्पष्टोऽर्थः (त्वंचेति) त्वंचमृत्योन सुज्ञेयमिति यदात्मस्वरूपमुक्तवान् । (वक्तेति) त्वादृक् त्वादृश इत्यर्थः अन्यत्स्पष्टम् ।

देवैः devai*h*, by the Gods

अत्र atra, in this (matter)

अपि api, even

विचिकित्सितं vichikitisitam, doubtful or had doubted

किल kila, verily. (I hear from Thee O Death that Devas had even doubted about it)

त्वं tvam, thou.

च cha, and.

मृत्यो mrityo O Death

यत् yat (यस्मात्) because

न na, not.

सुज्ञेयं suj*n*eyam, well-understood.

आत्थ âtha (कथयस्यतः *M.* वदसि) sayest. S. I hear from thee that Devas even doubted as regards this, and because thou O Death also sayest that the truth about self is not well-understood, therefore I ask it from thee. M. Do not try to resile from thy promise. why ? Because, O Death ! thou even sayest that Devas doubted it and it is not well understood, therefore &c.)

वक्ता vaktâ, speaker

च cha, and

अस्य asya (धर्मस्य M. मत्प्रश्न विषयस्य) of this or the subject of my question).

त्वादृक् tvâdrik (त्वत् तुल्यः) like Thee.

अन्यः anyah (पण्डितश्च) another.

न na, not

लभ्यः labhyah (अन्विष्यमाणोऽपि) to be found (even after search among the learned)

न अन्यः na anyah, not any other.

वरः varah, boon.

तुल्यः tulyah (सदृशः) equal, like

एतस्य etasya, of this
कश्चित् kaschit, what so ever

(Náchiketa said) O Death! about this certainly of old the Devas even were in doubt and thou also sayest that it is not easy of understanding; of this truth, a speaker like thee no other can be obtained, therefore, like this there is no other boon.

MANTAR 23.

शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान् । भूमेर्महदायतनं वृणीष्व स्वयञ्च जीव शरदो यावदिच्छसि ॥ २३ ॥

अन्वयः—(यमः उवाच) शतायुषः पुत्रपौत्रान् वृणीष्व, (तथा) बहून् पशून् हस्ति हिरण्यं अश्वान् भूमेः महत् आयतनं वृणीष्व, स्वयंच (अपि) यावत् शरदः (वर्षाणि जीवितुम्) इच्छसि, तावत् जीव ॥

वृत्तिः—एवं नचिकेतसोक्तो मृत्युर्विषयस्यदुरधिगमतयो सध्येन त्वद्दयतीतिनिश्चित्य सत्यपिग्रहणसामर्थ्ये विषयान्त

रासक्तचेतसे एतादृशंमुक्तात्म तत्वं नोपदेशार्हमितिमत्वा मुमुक्षार्यानुवृत्यर्थं प्रलोभयन्नुवाच । (शतायुष इति) स्पष्टोऽर्थः (भूमेरिति) पृथिव्याः विस्तीर्णमायतनं मण्डलं राज्यं वृणीष्व । अथवा भूमेः संबन्धिमहदायतनं विचित्रशाला प्रासादादियुक्तंगृहं वृणीष्व (स्वयंचेति) यावद्वर्षाणि जीवितुमिच्छसि तावज्जीवेत्यर्थः ।

शतायुषः *sátâyushah* (शतं वर्षाण्यायूंषि येषां तान् M. शतमायूंषि) centegenarian, or hundred lives or years.

पुत्र-पौत्रान् putra-pautrân, sons and grand-sons.

वृणीष्व vrinîshva, choose.

बहून् bahûn, many.

पशून् pasûn, cattle.

हस्ति hasti, elephants.

हिरण्यम् hiranyam, gold. Hasti-hiranyam is a compound Dvandva-ekavad-bhâva.

अश्वान् asvân, horses.

भूमेः bhûmeh (पृथिव्याः) of earth.

महद् mahat (विस्तीर्णं) wide, very broad.

आयतनं âyatanam (आश्रयं M. अतिविस्तीर्णभूखण्डं) piece, or abode or portion, or मण्डलं राज्यं circle of empire R. a mighty empire, or a glorious palace.

वृणीष्व vrinîshva, choose.

स्वयं svayam, thyself.

च cha, and.

जीव jîva (त्वं जीव धारय शरीरं समग्रेन्द्रियकलापं) live (thou).

शरदः saradah (वर्षाणि) autumns (or rains).

यावत् yâvat (यावत् कालम् जीवितुम्) as long as.

इच्छसि ichchhasi, thou wishest (to live).

(Yama said) choose sons and grandsons living for a hundred years; many animals, horses, elephants and gold. Choose a wide empire of earth and live thou thyself as many autumns as thou desirest.

MANTRA 24.

एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकाञ्च। महाभूमौ नचिकेतस्त्वमेधि कामानान्त्वा कामभाजं करोमि ॥ २४ ॥

अन्वयः—यदि एतत्तुल्यम् वरं मन्यसे वृणीष्व। वित्तं चिरजीविकां च। नचिकेतः! महाभूमौ त्वं एधि। त्वा कामानाम् कामभाजं करोमि।

वृत्ति—(एतत्तुल्यमिति) उक्तेन वरेण सदृशमन्यमपि वरं मन्यसे चेत्। तदपि वृणीष्व। प्रभूतं हिरण्यरत्नादिकं चिरंजीवनं चेत्यर्थः। एधि भव। राजेतिशेषः। अस्तेर्लोण्मध्यमपुरुषैकवचनम्। कामानाम्। काम्यमानानामप्सरः प्रभृतिविषयाणाम्। कामभाजं कामः कामना। तां विषयतयाभजतीति कामभाक् तम्। काम्यमानाप्सरः प्रभृतीनामपिकामनाविषयं करोमीत्यर्थः।

एतद् etat (एतेन यथोपदिष्टेन) this (to these as mentioned above).

तुल्यं tulyam (सदृशं M. त्वत् प्रार्थित वरतुल्यं) equal to; like (un-to the boon asked by thee, or equal to those mentioned above).

यदि yadi, if.

मन्यसे manyase, thou thinkest.

वरं varam, a boon (any other boon).

वृणीष्व vrinîshva. choose (that also).

वित्तं víttam, wealth (प्रभूतं हिरण्यरत्नादि) large quantity of gold, gems &c.

चिरजीविकां च chira-jîvikâm cha (चिरजीवनहेतुं) and the means of living long.

महाभूमौ mahâ-bhûmau (महत्यां भूमौ राजा M. पुण्यभूमौ) (king) in a mighty land M. (born) in a sacred land.

नचिकेतः Nachiketah O Nachiketas !

त्वम् tvam, thou.

एधि edhi (भव or M. वर्धस्व) be (Imperative of अस् to be). Be thou (born or a king) in a big (or) sacred land. Or the word "edhi" may be derived from एध 'to increase' and then, एधि would mean वर्धस्व 'increase'. That is 'be thou prosperous in a sacred land'; another reading according to M. is महान् भूमौ ॥ Then the meaning would be "Be thou mighty in the land."

कामानां kâmânâm (दिव्यानां मानुषाणां च M. काम्यमानानाम् मध्ये) of desires (divine and human), amongst those who are wished for,

त्वा tvâ (त्वां) thee.

कामभाजं kâma-bhâjam (कामभागिनं, कामार्हं M. कामितभाजं) enjoyer : sharing in desires, worthy of having objects of desire. M. a sharer amongst those who are desired *ie.* One of the " adored " or " desired ones " of earth.

करोमि karomi, I make (for I am One whose will is never frustrated).

If thou thinkest (there is) any other boon like this, choose that also. Choose wealth and long life, O Nachiketa, be thou a king of wide world. I shall make thee an object of desire even to those whom the world desires.

MANTRA 25.

ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामांश्छन्दतः प्रार्थयस्व । इमा रामाः सरथाः सतूर्या नहीदृशा लम्भनीया मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ॥ २५ ॥

अन्वयः—ये ये कामाः मर्त्तलोके दुर्लभाः (तान्) सर्वान् कामान् छन्दतः प्रार्थयस्व ॥ इमाः सरथाः सतूर्याः रामाः, ईदृशाः नहि मनुष्यैः लम्भनीयाः ॥ मत् प्रदत्ताभिः आभिः परिचारयस्व । नचिकेतः मरणं मा अनुप्राक्षीः or मरणं अनु मा प्राक्षीः ॥

वृत्ति—(येयेकामा इति) छन्दतः यथेष्टमित्यर्थः (इमारामा इति) रथवादित्रसहिताः मया दीयमानाः स्त्रियः, मनुष्याणां दुर्लभा इत्यर्थः।(आभिरिति) आभिः मया दत्ताभिःपरिचारिकाभिः पादसंवाहनादिशुश्रूषांकारयेत्यर्थः। मरणमनु मरणात्

मुक्तेः पश्चात्। मुक्तात्मस्य रूपमिति यावत्। मरण-शब्दस्य देहवियोग सामान्यवाचिनोऽपिप्रकरणवशेन विशेष वाचित्वं न दोषायेति द्रष्टव्यम्।

ये ये ye ye. what what *ie.* what-so-ever.

कामाः kâmâ*h* (प्रार्थनीयाः) objects of desire or solicitation

दुर्लभाः durlabhâ*h*, difficult of attainment.

मर्त्यलोके martyaloke (M. भूर्लोके, मानुषदेहे वा) in the mortal world, in the Bhûr-loke or in the human body.

सर्वान् sarvân, all (those).

कामान् kâmân, desires (or objects of desire and solicitation).

छन्दतः chhandata*h* (इच्छातः M. स्वेच्छानुसारेण) R. यथेष्टं as desired: according to (thy) measure, R. as wished.

प्रार्थयस्व prârthayasva, ask thou.

इमाः imâ*h*, these (divine apsaras, angelic beings, beautiful, accomplished, dwellers of Death world).

रामाः râmâ*h* (रमयन्ति पुरुषान् M. स्त्रियः) women, lit. delight-givers; charmers. M. M. fair maidens.

सरथाः sa-rathâ*h* (सह रथैर्वर्तन्ते) with chariots.

सतूर्याः sa-tûryâ*h* (सवादित्राः M. सोपस्करा इत्यर्थः) M. M. with musical instruments.

न na, not

हि hi, verily

ईदृशाः îdrisâ*h* or ईदृशी îdrisî (एवं विधा M. ईदृशी सम्पत्) like these,

लम्भनीयाः lambhanîyâh (प्रापणीयाः M. प्राप्याः) M. M. to be obtained ; to be got.

मनुष्यैः manushyaih (मर्त्यैः) by men (or mortals)

आभिः âbhih (M. रथादि उपेताभिः स्त्रीभिः) by these (damsels).

मत् प्रत्ताभिः mat prattâbhih (मया दत्ताभिः परिचारिणीभिः M. मद् दत्ताभिः) by me given.

परिचारयस्व parichârayasva (आत्मानं पादप्रक्षालनादि शुश्रुषां कारया त्मनः M. परिचर्यस्व, सेव्यो भव) be served by them, cause them to wait on thee (by washing thy feet &c.)

नचिकेतः nachiketah O Nachiketas !

मरणं maranam (मरणसंबद्धं प्रश्नं प्रेतेऽस्ति नास्ति इति काकदन्तपरीक्षारूपं M. मरणवंतं मृतस्थभगवंतं) Death (the question relating to death—the idle curiosity as to whether there is or is not an Atmâ after death. M. About the dead persons and the Lord living in the dead).

मा अनुप्राक्षीः mâ anuprâkshîh (मा एवं प्रष्टुमर्हसि M. नैव पृच्छ) thou shouldst not ask ; M. do not ask. R the word अनु should be construed with मरणं, *ie*, मरणं अनु = मरणात् मुक्तेः पश्चात् "after Death *ie.* the *post-mortem* state." The Death here means Mukti, *ie.* the *post Mukti* condition.

Whatever desires are difficult of attainment in the mortal body, all those desires, fully mayst thou ask. These women with chariots and musical instruments, (may be thine). Like them men verily cannot get. Be thou served by these given

by me. O Nachiketas: Do not enquire after death. Or R. Do not enquire about the after-Mukti condition.

MANTRA. 26

श्वो भावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणाञ्जरयन्ति तेजः। अपि सर्वञ्जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥ २६ ॥

अन्वयः —(नचिकेताः उवाच) हे अन्तक ! (भोगाः) श्वोभावाः; मर्त्यस्य सर्वेन्द्रियाणां यत् एतत् तेजः (तत्) जरयन्ति ॥ सर्वं अपि जीवितं अल्पं एव; तव वाहाः, नृत्यगीते तव एव (तिष्ठन्तु) ॥

वृत्ति—एवं प्रलोभ्यमानोपि नचिकेता अक्षुभितहृदय आह। (श्वोऽभावा इति) हे अन्तक। त्वदुपन्यस्ता ये मर्त्यस्य कामाः ते श्वोभावाः। श्वः अभावो येषां ते तथोक्ताः दिनद्वयस्थायिनो न भवन्तीत्यर्थः। सर्वेन्द्रियाणां यदेतत्तेजः। तत् क्षपयन्ति। अप्सरः प्रभृतिभोगाहि सर्वेन्द्रियदौर्बल्यावह इति भावः (अपिसर्वं मिति) ब्रह्मणोपिजीवितं स्वल्पं किमुता अस्मदादिजीवितम्। अतश्चिरजीविकापि नवरणार्हेति भावः। वाहाः। रथादयः। तिष्ठन्त्वतिशेषः।

श्वः *svah* (भविष्यन्ति न भविष्यन्ति वा इति संदिह्यमान एव येषां भावः M. परेद्युः) to-morrow (whether they will or will not last till to-morrow; things whose existence is so doubtful R. श्वः अभावो येषां "not lasting till to-morrow."

भावाः bhâvâ*h* or M. R. अभावाः abhâvâ*h* (भवनं M, परेद्युः अभावाः भवन्ति इति भावाः, नभावाः अभावाः, असंतः,

अस्थिरताः) lasting. M. R. not-lasting ; not-existing, not stable, transitory R. which do not last for two days even.

मर्त्यस्य martyasya (मनुष्यस्य) of the mortal (man).

यत् yat, because (M. ये) = these. (यद् एतत् = ये एते all these)

अन्तक antaka (हे मृत्यो) O Ender ! O Death !

एतत् etat, this (M. एते पुत्रादयः) these sons &c. Singular for Plural.

सर्वेन्द्रियाणां sarvendriyâ*n*âm, of all the senses.

जरयन्ति jarayanti (अपक्षयन्ति M. अपगमयन्ति) (they) cause decay. M. M. wear out; exhaust; take away. M. The effort in preserving these objects of enjoyment causes the decay of the vigour of all senses. S. The apsaras &c. and other sensual enjoyments are all evil.

तेजः taja*h* (M. वीर्यं) M. M. vigour. The heat, the energy, the fire, the vital fluid.

अपि api, also

सर्वम् sarvam (यद् ब्रह्मणः) all (even of Brahmâ)

जीवितम् jîvitam (आयुः) life.

अल्पम् alpam, short.

एव eva, even. (as the life of a Brahmâ even has an end, not like those of the Muktas which has no end).

तव tava, thy

एव eva, even (अस्तु or तिष्ठन्तु)

वाहाः vâhâ*h* (रथादयः M. रथादिवाहनानि तवैवसन्तु) chariots,

तव tava. thine

नृत्यगीते or M. नृत्यगीतं Nritya-gîte or nritya-gitam (द्वन्द्वैकवद्भावः, रामाभिः क्रियमाणं तवास्तु) dancing and singing (let be).

O End-maker (all these enjoyments) are transitory. They exhaust all this energy of the senses of man. The longest life is indeed short. Thy vehicles, thy dancers and singers remain with thee.

MANTRA 27.

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्वा। जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥ २७ ॥

अन्वयः—मनुष्यः वित्तेन न तर्पणीयः । चेत् (यदा) त्वा (त्वां) अद्राक्ष्मो वित्तं लप्स्यामहे । जीविष्यामः यावत् त्वम् ईशिष्यसि । तु (किन्तु) सः एव वरः मे वरणीयः ॥

वृत्ति—(नवित्तेनेति) नहि वित्तेन लब्धेन कस्यचित्तृप्तिः दृष्टचरी । नजातुकामः कामानामुपभोगेन शाम्यतीतिन्यायादितिभावः। किंच (लप्स्यामहे वित्तमिति) त्वां वयं दृष्टवन्तश्चेत् । वित्तं प्राप्स्यामहे । त्वं दर्शनमस्तिचेत् । वित्तलाभे को भार इति भावः॥ तर्हि चिरंजीविकाप्रार्थनीयेत्यत्राह (जीविष्यामोयावदिति) यावत्कालंयाम्य पदेत्वमीश्वरतयावर्तसे। व्यत्ययेन परस्मैपदं तावत्पर्यन्तमस्माकमपि जीवितं

सिद्धमेव । नहि त्वदाज्ञातिलंघनेन अस्मज्जीवितान्तकरः कश्चिदस्ति। वरलाभालाभयोरपि तावदेवजीवनमिति भावः। अतः। येयं प्रेत इति प्राक्प्रस्तुतोवर एव वरणीय इत्यर्थः ।

न na, not.

वित्तेन vittena, by wealth.

तर्पणीयः tarpaṇîyah (M. आप्यायनीयः) Satisfied M. M. made happy.

मनुष्यः manushyah, man.

लप्स्यामहे lapsyâmahe (प्राप्स्यामहे) we shall obtain (if we have the thirst for wealth).

वित्तं vittam, wealth.

अद्राक्ष्म adrâkshma (दृष्टवन्तो वयं) when we have seen.

चेत् chet, if (S. If we have desire of wealth, we shall surely get it, *as* we have seen thee. M. *If* or *when* we have seen thee, then certainly we shall get wealth, for life, wealth &c. are secondary rewards that necessarily follow the sight of a God like Thee–they need not be asked for separately. R. Where is the difficulty in obtaining wealth when we have had the good fortune of seeing Thee, which is more difficult).

त्वा tvâ (त्वाम्) thee.

जीविष्यामः jîvishyâmah, we shall live

यावद् yâvad (याम्ये पदे M. यम यावदायुषः ईश्वते भविष्यति तावत् कालं) so long (as on the post of Yama art thou the occupant, M. So long as of my life, thou art the lord, up to that time I shall live : for thou art the lord of life.

ईशिष्यसि îsishyasi (ईशिष्यसे, प्रभुः स्याः M. ईश्वरो भविष्यसि) thou wilt rule (thou remainest lord, M. or art God of my life). R. So long as thou holdest the office of Yama. So long as the lordly authority of Yama is vested in thee, there is no one who can take away our life, by disregarding thy command.

त्वं tvam, thou.

वरः varah, boon.

तु tu, only, verily (M. This indicates the supremacy of this boon).

मे me, mine.

वरणीयः varaniyah, to be chosen

स sa, that (प्राग् याचित एव) which I have already asked.

एव eva, indeed. That is, how can a man who has the good fortune of seeing thee or getting thy favor, have short life or wealth.

The man is not satisfied with wealth. When we have seen thee, we shall obtain wealth. We shall live, so long as thou rulest (as Yama). But that indeed is the boon chosen by me.

MANTRA 28.

अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्वधःस्थः प्रजानन् । अभिध्यायन् वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत ॥ २८ ॥

अन्वयः—क्वधःस्थः जीर्यन् कः मर्त्यः अजीर्यताम् अमृतानाम् उपेत्य, प्रजानन् (विद्वान् सन्) वर्णरति प्रमोदान् अभिध्यायन् अतिदीर्घे जीविते रमेत ॥

वृत्ति—(अजीर्यतामिति) जरामरण शून्यानां मुक्तानां स्वरूपं ज्ञात्वा प्रजानन्। विवेकी जरामरणोपप्लुतोऽयंजनः। तदास्थः। जरामरणाद्युपप्लुताप्सरः प्रभृतिविषयविषय कास्थावान् क्व। कथं भवेदित्यर्थः (अभिध्यायन्निति) वर्णाः आदित्यवर्णत्वादि रूपविशेषाः। रतिप्रमोदाः ब्रह्मभोगादि जनितानन्द विशेषाः। तान् सर्वानभिध्यायन् निपुणतया निरूपयन्। अत्यल्पे हि केजीविते कः प्रीतिमान् स्यादित्यर्थः।

अजीर्यताम् ajîryatâm (वयोहानिमप्राप्नुवतां M. उपलक्षणं; वयः प्रभृति सम्पत्ति मतां) of not-decaying, those whose life period never shortens: those who are lords of life &c. M. M. free from decay.

अमृतानां amritânâm (M. देवानां R. मुक्तानां = of the Liberated) of the immortals, of the Devas.

उपेत्य upetya (उपगम्य M. प्राप्य R. ज्ञात्वा, the word सकाशं should be supplied) having reached (the company.) M. M. having approached. R. Having understood (the nature of the Muktas who are free from death and decay).

जीर्यन् jîryan (जरामरणवान्) decaying.

मर्त्यः martyah, mortal.

क्वधःस्थः kvadhahsthah or M. क्वाधस्तः kvâdhastah (S. कुः = पृथिवी अधश्च अन्तरिक्षादिलोकापेक्षया; तस्यां तिष्ठति इति = क्वधःस्थः॥ M. क्वअधस्तो प्रकृष्टश्च; क्व कुत्र; न कुत्रापि, किन्तु महानेव अजीर्यन् एव आस्ते इति अर्थः॥) S. Earth-lower-

staying. A compound of three words कुः = Earth; अधः = low or down *i e*, lower than the astral and other regions, स्थः = staying. That is a person who lives on the lower earth; *a denizen of the lower sphere.* Another reading by S. is क्वतदास्थः = "who, given to these (pleasures of having sons.) M. क्व = where, अधस्तः = has been drawn down. Where has the man who has approached the Immortals ever fallen down? Never. He always becomes or remains great and undecaying. R. क्वतदास्थः = *How have faith in these* (apsaras &c. understanding their unstable nature).

प्रजानन् prajânan (उपलभमानः M. हे प्रजानन् विद्वन्), standing, knowing, M. O wise one! R. विवेकी 'the discriminating.'

अभिध्यायन् abhi-dhyâyan (निरूपयन् यथावद् M. स्मरन्) reflecting over, meditating over M M. pondering on. M. Remembering. Wisely understanding.

वर्ण varna—(गीतिः M. ब्राह्मणादिः देहगतशोभा विशेषोवा) Colour, Song, M. M. beauty M. Castes like Brahmana &c. or the beauty of the body. R. A particular form like the colour of the Sun: the glorious super-physical form.

रति rati—(क्रीडा M. विषयानुभवजं सुखं) play, love, M. the pleasure derived from sensual gratification. R. Joy produced by enjoying the bliss of the condition of being a Brahmâ: रति-प्रमोदाः is a compound word-meaning the ecstasy of union (with Brahm)."

प्रमोदान् pramodân M. (प्रकृष्टविषयानुभवजं सुखं) pleasures. M. the pleasure derived from the experiencing of higher objective gratification, intellectual pleasures. Or the pleasures of music (varna) and sports (rati).

अति-दीर्घे ati-dîrghe, in a prolonged. R, reads अति-अल्पे in a very short.

जीविते jîvite, living.

को रमेत kah rameta, who delights.

S. Reaching the presence of the undecaying and the undying, and knowing (that higher gifts can be obtained from them than wealth &c.), how a decaying mortal, a denizen of the lower sphere, (can ask lower gifts) ? Who can delight in long life while contemplating (the transitory nature of) the pleasures of beauty and love ?

R. Knowing (the nature of the Muktas who are) free from decay and death, how can the decaying Mortal, who has realised (his own imperfection), put any faith in these (apsaras) constantly meditating over the Radiant-Form, the Bliss-of union, who can find joy even in the longest (earthly) life.

M. O wise (Yama) ! Having (once) approached (the vicinity) of the Undecaying and the Undying where (has ever) a decaying mortal been drawn down ? (Even a long life is not desirable for) remembering (the bye-gone) beauty, pleasures and joys, who can find happiness in a long life ?

MANTRA 29.

यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति

ब्रूहि नस्तत्। योऽयं वरो गूढमनुप्रविष्टो नान्यन्तस्मान्नचि-
केता वृणीते ॥ २९ ॥

अन्वयः—मृत्यो ! यस्मिन् इदं विचिकित्सन्ति महति साम्पराये यत् अस्ति तत् न ब्रूहि । यः अयः वरः गूढं अनुप्रविष्टः, तस्मात् अन्यं नचिकेताः न वृणीते ॥

(यस्मिन्निति) महतिपारलौकिके यस्मिन्मुक्तात्म स्वरूपे संशेरते । तदेव मे ब्रूहि (येयमिति) गूढं आत्मतत्व मनुप्रविष्टः येयंवरः । तस्मादन्यं नचिकेता न वृणीतेस्म । इति श्रुतेर्वचनम् ।

यस्मिन् (प्रेते) इदं (विचिकित्सनं) विचिकित् सन्ति, (हे मृत्यो सांपराये महति यत्, तत् ब्रूहि नः (अस्मभ्यं) ॥ योऽयं वरो गूढं अनुप्रविष्टः, तस्मात् वरात्) अन्यम् नचिकेता न वृणीते ॥

यस्मिन् yasmin (प्रेते M. विषये) in which (after death or in which subject), *about which.*

इदं idam (विचिकित्सनं M. इत्थं प्रेत प्रेरकतया अस्ति न वा) such ; *this,* (doubt : M. whether there is such ruler of dead).

विचिकित्सन्ति vichikitsanti (M. संदिहते जनाः) People make enquiry or *raise doubt.*

मृत्यो mrityo, *O Death* !

यत् yat, what (M. has not this यत् in the text).

साम्पराये sâmparâye (परलोकविषये M. मुक्तौ "निमित्तप्रमो मोक्षार्थे R. मुक्तात्मस्वरूपे") S. about the next world. M. For the sake of liberation. In the matter of the Hereafter. For the sake of Supreme libera-

tion. R. The great Hereafter (state of the liberated).

महति mahati, (महत् प्रयोजननिमित्ते) in the great, Supreme.

ब्रूहि brûhi (कथय M. उपदिश) Say, teach.

नः nah (अस्मभ्यम्) to us.

तत् tat, that. M. तत् तु नः=तदेव प्रेतप्रेरकस्वरूपं that- *ie.* the essential form of the Lord who rules the dead.

यः ya*h*, what, as.

अयम् ayam (प्रकृत आत्म विषयः) this (about the Atmâ).

वरः vara*h* (M. प्रेतप्रेरकस्वरूपोक्तिप्रार्थनरूपः) boon.

गूढं gûdham (गहनं दुर्विवेचनं M. गोप्यतां) occult, deep, secret, hidden.

अनुप्रविष्टः anupravishta*h* (प्राप्तः) has entered or attained, or is related to.

न na, not.

अन्यं anyam (वरं) any other (boon).

तस्मात् tasmât, than that (boon) ; or therefore.

नचिकेता Nachiketâ, Nachiketas.

वृणीते vrî*n*îte, Chooses.

O Death, as with regards to the Great Hereafter (the condtion of the Muktas), they have raised this doubt, that indeed tell thou to us. As this boon relates to the Hidden, therefore Nachiketas does not choose any other boon.

About which (people) have raised such doubts, that (God) indeed, O Death, reveal thou to us (that we may get) the Supreme Liberation. As (the subject of) this boon has been kept a secret (so long), therefore, no other boon does Nachiketa choose.

अथ प्रथमाध्याये द्वितीया वल्ली ।

MANTRA 1.

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषँ सिनीतः। तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥ १ ॥

अन्वयः—श्रेयः अन्यत् उत (तथा) प्रेयः अन्यत्, ते उभे नानार्थे पुरुषं सिनीतः (बध्नीतः) ॥ तयोः श्रेयः आददानस्य (ग्रहीतुः) साधु (शिवं) भवति ॥ यः उ प्रेयः वृणीते (उपादत्ते) अर्थात् (परमार्थात्) हीयते ॥

अन्यत् anyat (पृथगेव) other, different.

श्रेयः *sreyah* (निःश्रेयसं M. प्रशस्ततमं ब्रह्मज्ञानं) M. M. Good. S. Summum Bonum, liberation. M. most praiseworthy, the knowledge of Brahman. R. the Moksha. The Path of Wisdom or Vidyâ.

अन्यत् anyat, different, other.

उत uta (अपि) also.

एव eva, indeed M. इव iva, as if.

प्रेयः *preyah* (प्रियतरम् M. प्रियतमम् दारापत्यादिकाम्यमानं वस्त्वपि अन्यदिव इति न जानतां दारापत्यादिरूपप्रेयसोऽपि सहुंभद्वारा श्रेयस्त्वमेव इति सूचनाय एव शब्दः) M. M. pleasant. M. most pleasing, the desired objects

like wife, children &c. are as if another. The man who thus knows the difference between Brahma—jnâna and worldly blessings, for him these worldly things, wife, children &c. become means of liberation, through right understanding. This is the force of "even." One gives future, and the other present happiness. R. The enjoyments. The Path of Avidyâ or Action, leading to endless births and deaths, but not liberation.

ते te (प्रेयः श्रेयसी) these two (the good and the pleasant).

उभे ubhe, both.

नानार्थे nânârthe (nânâ and arthe) (भिन्नप्रयोजने or M. भिन्नप्रयोजनके) different objects.

पुरुषं purusham (अधिकृतं वर्णाश्रमादि विशिष्टं M. देहिनं) a man, a qualified person, having particular caste, stage of life &c. M. the embodied Soul.

सिनीतः sinîtah (बध्नीतः) bind. There are two attachments of the Soul—one towards the Spiritual and the other towards the Temporal.

तयोः tayoh (M. श्रेयः प्रेयसोर्मध्ये) of these two (good and pleasant).

श्रेयः sreyah (M. ब्रह्मविद्यां) the good (the Brahma Vidyâ).

आददानस्य âdadânasya (उपादानं कुर्वतः M. उपासीनस्य) of him who accepts, who worships. M. M. who clings. R. मोक्षाय प्रयतमानस्य who struggles for or endeavours towards Moksha.

साधु sâdhu (शोभनं शिवं M. भद्रं भवमोचनं) well, auspiciousness, M. freedom from rebirth and worldly existence.

भवति bhavati, is or becomes.

हीयते hîyate (वियुज्यते M. हीनो भवति भवपाशे एव बद्धो भवति) M. M. misses, loses or becomes low, (is bound in the chains of rebirth).

अर्थात् arthât (पुरुषार्थात् पारमार्थिकात् प्रयोजनात् नित्यात् M. परमपुरुषार्थात्) M. M. end; the supreme object of man, the Eternal.

यः yah, who (short-sighted person).

उ u (एव) indeed.

प्रेयः preyah, pleasant (wife, children &c.)

वृणीते vrinîte (उपादत्ते) chooses.

Different is the Good and different indeed is the Pleasant: both these towards diverse objects draw down the man. Of these two, for him who accepts the Good, there is freedom; but he who chooses the Pleasant, misses the object.

MANTRA 2.

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः। श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते ॥ २ ॥

अन्वयः—श्रेयः च प्रेयः च मनुष्यम् एतः। धीरः तौ सम्परीत्य विविनक्ति। धीरः प्रेयसः श्रेयः हि अभिवृणीते ॥ मन्दः योगक्षेमात् प्रेयः वृणीते ॥

श्रेयस् sreyas, good.

च cha, and

प्रेयः preyah, pleasant

च cha, and

मनुष्यम् manushyam (पुरुषं) man

एतः etah (आ इतः It is a compound verb; the upsarga आ is added to the Present 3rd Pers. Dual इतः from इ "to go") approach (M. प्राप्य तिष्ठतः or S. प्राप्नुतः) These two stay approaching him. Promiscuously surround.

तौ tau, these two (the Good and the Pleasant, the Brahma Vidyâ and the Kâma objects) Dharma and Adharma.

सम्परीत्य samparîtya (सम्यक्परिगम्य, मनसा आलोच्य M. सम्यक् ज्ञात्वा) fully understanding, reflecting with mind, fully knowing. M. M. going round about; examining.

विविनक्ति vivinakti (पृथक् करोति M. श्रेयो मोचकं, प्रेयोबंधकं इति विवेचयति) separates, distinguishes (that the Good causes liberation, and the Pleasant causes bondage).

धीरः dhîrah (धीमान् M. विवेकी R. प्रज्ञाशाली) the wise, the discriminating one. R. धिया रमते=धीरः "who delights in wisdom."

श्रेयः sreyah, the good, the Brahma-vidyâ. The Path of Liberation.

हि hi (एव) only.

धीरः dhîrah, the wise one.

अभि (वृणीते) abhi. An upasarga to be joined to the verb vrinîte. According to M. it governs the noun preyasah and means अवज्ञाय "rejecting,"

प्रेयसः preyasah, (प्रियतमान् दारापत्यादि कामान्) the pleasant.
वृणीते vrinite, chooses.
प्रेयः preyah the pleasant.
मन्दः mandah (अल्पबुद्धिः M. विवेकहीनः) the dull, the fool, the man of small understanding, devoid of discrimination.
योगक्षेमात् or न् yoga-kshemât or yoga-kshemân M. M. greed and avarice. योगक्षेमनिमित्तं शरीरादि उपचय रक्षणनिमित्तं M. अप्राप्त कामप्राप्तिर्योगः ; तस्य अनपगतेन स्थिरत्वं क्षेमः) for the sake of *growth* and *preservation* (of body &c.); *acquisition* (of new wealth) and *preservation* of old; the Path of samsara.
वृणीते vrinîte, chooses.

The Good and the Pleasant promiscuously surround the man. The wise fully examining them, distinguishes (them). The wise chooses the Good over the Pleasant. The ordinary man chooses the acquisition-preservation (Path of Action).

MANTRA 3.

स त्वं प्रियान् प्रियरूपांश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः । नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥ ३ ॥ path of wealth

perish

अन्वयः—नचिकेतः त्वं प्रियान् प्रियरूपान् च कामान् अभिध्यायन् अत्यस्राक्षीः । एतां वित्तमयीं सृङ्कां न अवाप्तः । यस्यां बहवो मनुष्याः मज्जन्ति ॥

{ स sa, he (merely emphatic, not to be translated).
{ त्वं tvam, thou

प्रियान् priyân (पुत्रादीन् M. दारापत्यादीन्) the pleasures (objects like sons and wives.)

प्रियरूपान् priya rûpân, M. M. are delightful (अप्सरः प्रभृति-लक्षणान् M. गृहारामक्षेत्रादीन्) seeming pleasant (such as apsaras &c. or houses, gardens, &c.) M. M. seem delightful.

च cha, and.

कामान् kâmân (M. काम्यमानान्) desires. M. M. pleasures. M. Objects of desires.

अभि-ध्यायन् abhi-dhyâyan (चिन्तयन् तेषां अनित्यत्व असारत्वादि दोषान् M. अस्थिरतया मत्वानः) meditating, pondering, thinking over (their transitoriness and worthlessness).

नचिकेतः O Nachiketas !

अत्यस्राक्षीः atya-srâkshîh (अतिसृष्टवान् परित्यक्तवान् असि M. त्यक्त-
or वान् अभूः) hast rejected. M. M. dismissed.

अन्यत्प्राक्षीः anyat-prâkshîh (अन्यत्=ब्रह्मस्वरूपं, प्राक्षीः=अप्राक्षीः ॥ पृष्टवान् असि, अ omitted as a Vedic irregularity) thou didst ask the other (about Brahman)

न na, not

एतां etâm, this (worthy of putting on the neck).

सृङ्कां srinkâm (सृतिं कुत्सितां मूढजनप्रवृत्तां M. सृङ्कां शृङ्खलां) road, the neck-lace, the chain.

वित्तमयीं vittamayim (धनप्रायाम् M. सुवर्ण मयीं) leading to wealth. M. golden (chain), strong.

अवाप्तः avâptah (स्वीकृतवान्) didst accept. M. M. hast gone.

यस्यां yasyâm, in which (road or chain).

मज्जन्ति majjanti, (सीदन्ति M. आसक्ताः भवन्ति) *sink, fall,* or are attached, perish, go astray.

बहवः bahavah, many.

मनुष्याः manushyâh, men.

O Nachiketas! Thou having pondered over all desires—the pleasing forms, hast renounced (them). Thou didst not accept this Path of Wealth, in which go astray many men.

MANTRA 4.

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता। विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्त ॥ ४ ॥

अन्वयः—या च अविद्या विद्या इति ज्ञाता, एते दूरं विपरीते विषूची। अहं नचिकेतसं विद्याभीप्सिनं मन्ये। त्वा (त्वां) बहवः कामाः न लोलुपन्त॥

दूरम् dûram, (दूरेण महतान्तरेण M. अन्योन्यं विदूरतो वर्तमाने) M. M. wide apart; *distant*; separated from one another by a great interval.

एते ete, these two.

विपरीते viparîte, (अन्योन्य व्यावृत्तरूपे M. परस्परं विरुद्धे) opposite M. M. leading to different points.

विषूची vishûchî, (विषूच्यौ, नानागती, भिन्नफले M. विषूचिने विरुद्ध फलहेतू) different directions, different fruits, causing different results: pointing to different directions.

अविद्या avidyâ, (प्रेयोविषया) ignorance (objects of pleasure) R. consisting of actions led by desire.

या yâ, what.

च cha. and.

विद्या इति vidyâ iti, (श्रेयोविषया) Wisdom (leading to emancipation) (M. या अविद्या विद्याभिन्ना वैदिक

सुख साधने न ज्ञाता या च विद्या इति ज्ञाता एते दूरं) That which is avidyâ i. e. other than vidyâ, known as a means of attaining temporal pleasures, and that which is vidyâ, these two are far apart.) R. Consisting of Vairagya, Wisdom.

ज्ञाता jnâtâ (निर्ज्ञाता अवगता पण्डितैः) is known (by the wise)

विद्या-अभीप्सिनं or तं vidyâ-abhîpsinam or-tam (विद्यार्थिनं M. विद्याभिकांक्षिणं) Wisdom—desirer. Seeker of knowledge.

नचिकेतसं Nachiketasam, Nachiketa.

मन्ये manye, (जानामि) I think, I believe or know.

न na, not.

त्वा tvâ (त्वां) thee.

कामाः Kâmâh (अप्सरः प्रभृतयः) Desires (like Apsaras &c.)

बहवः bahavah, many.

अलोलुपन्त or लोलुपन्तः alolupanta or lolupantah (न विच्छेदं कृतवन्तः M. लोलुपयन्तः अपेक्षां जनयन्तः न वर्तन्ते) M M. tear away ; M. causing expectation or desire i. e. the various Kâmâs did not produce any desire or expectation or inclination in thee. R. did not attract thee away from the Path of the Good.

These two are distant, opposing and different-pointed: Avidyâ and what is known as Vidyâ. I think Nachiketas to be a seeker of wisdom, (for) the many desires did not distract thee.

MANTRA 5.

अविद्यायामन्तरे वर्त्तमानाः स्वयन्धीराः पण्डितम्-मन्यमानाः। दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः ॥ ५ ॥

अन्वयः—अविद्यायां अन्तरे वर्त्तमानाः, स्वयं धीराः पण्डितम्मन्यमानाः, मूढाः दन्द्रम्यमानाः परियन्ति, यथा अन्धेन एव नीयमानाः अन्धाः ॥

अविद्यायाम् avidyâyâm M. (ब्रह्मविद्येतरस्मिन्) in ignorance (in study of sciences other than that of Brahma) R. In ignorance, in the shape of actions motived by personal desires &c.

अन्तरे antare, (मध्ये घनाभूत इव तमसि) midst (as if of deep darkness.)

वर्त्तमानाः vartamânâh, (वेष्ट्यमानाः M. केवलं तन्मात्रोपासकाः) dwelling, being surrounded, those who worship Tanmătras alone.

स्वयं svayam, (वयं) themselves.

धीराः dhîrâh, (प्रज्ञावन्तः M. स्वयमेव धीमन्तः) wise (saying 'we alone are wise'). M. M. wise in their own conceit.

पण्डितं panditam, (पण्डिताः शास्त्रकुशलाः M. आत्मानं पण्डित) learned (versed in scriptures)

मन्यमानाः manyamânâh, (M. जानंतः) considering. M. M. (puffed up with vain knowledge).

दन्द्रम्यमाणाः dandramyamânâh, (अत्यर्थं कुटिलां अनेक रूपांगतिं गच्छन्तः M. वक्रगतयः) going crooked. M. M. staggering to and fro. Distressed by the sorrows of decay, disease &c. R. Another reading is " dan-

dravyamânâh" constantly running; minds *always swiftly running*, propelled by the fire of kâma.

परियन्ति pari-yanti (परिगच्छन्ति M. परितः स्वर्गनरकादीन् गच्छंति) go round and round (to heaven and hell): wander, go up and down :

मूढाः mûḍhâh (अविवेकिनः M. कामभोगेन मोहिताः) fools, non-discriminating, deluded by the enjoyments of kâma.

अन्धेन andhena, (दृष्टिविहीनेन) by the blind.

एव eva, indeed.

नीयमानाः nîyamânâh, led.

यथा yathâ, as.

अन्धाः andhâh, blind men.

Dwelling in the midst of Ignorance ; but thinking themselves wise and learned, the fools wander about hither and thither, as blind men led by the blind.

MANTRA. 6

न साम्परायः प्रतिभाति बालम्प्रमाद्यन्तं वित्तमोहेन मूढम् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ॥ ६ ॥ एव अस्ति परलोको नास्ति

अन्वयः—प्रमाद्यन्तं वित्तमोहेन मूढं, बालं प्रति साम्परायः न भाति । अयं लोकः (अस्ति) परः (लोकः) न अस्ति इति मानी, पुनः पुनः मे (मम) वशं आपद्यते ॥

न na, not.

साम्परायः sâmparâyah, (संपरेयत इति सांपरायः, परलोकः, तत्प्राप्तिप्रयोजनः साधनविशेषः शास्त्रीयः साम्परायः M.

श्रेयस् साधनीभूतो भगवान्) the Here-after ; the Next World, the particular training necessary to reach that. M. God ; the means of liberation. R. The means for the attainment of the Next World. सम्-परा-ईयते = सम्परायः, परलोकः literally complete-supreme-gone : the next world ; the scriptural practice (sâdhan) leading to samparâya, is called Sâmparâya. Or that which is attained (ईयते गम्यते) fully, (sam,) after (para) the falling off of the body is called samparâya, the next world. The means of attaining it is Sâmpâraya. May not Samparâya mean " the complete (sam) merging (iya) into the Supreme (Para);" and Sâmparâya the science that teaches this complete merging.

प्रति-भाति prati-bhâti, (प्रकाशते M. न भाति न तज्ज्ञानविषयो भवति) appears, manifests, (God does not become the object of knowledge.)

बालं bâlam, (अविवेकिनं M. बालसदृशं) the child, or who is like a child (ignorant and non-discriminating)

प्रमाद्यन्तं pramâdyantam (प्रमादं कुर्वन्तं पुत्रपश्वादिप्रयोजनेषु आसक्तमनसं M. प्रमादोपेतं) acting carelessly ; heedless, whose mind is attached to sons and cattle &c.

वित्तमोहेन vitta-mohena, (वित्तनिमित्तेन अविवेकेन) by the delusion of wealth.

मूढं mûdham, (तमसाऽच्छन्नं सन्तं) deluded (surrounded or enwrapped in Tamas)

अयं ayam, (दृश्यमानः स्त्री अन्न-पानादि विशिष्टः M. भूर्लोकः) this (visible consisting of wife, food, drink &c.) M. The physical plane or Bhû-loka.

लोकः lokah, region, world.

न अस्ति na asti, there is no.

परः parah (अदृष्टो लोकः M. आमुष्मिकः) M. M. the other. The invisible world. M. The worlds above the Bhû.

इति iti, thus. R. another reading is उत "also." For him there is neither this loka nor the next.

मानी mânî (मननशीलः M. ऐश्वर्यं स्थिरं इति मानी, अभिमानी) thinking; M. the proud, who thinks the worldly wealth &c. is permanent. R. दुर्मानी = Wrong-thinking, deluded.

पुनः पुनः punah punah (जनित्वा) again and again (by being born).

वशं vasam, (अधीनतां) control, M. M. sway ; subordination.

आपद्यते âpadyate, falls.

मे me (मम, मृत्योः M. यमस्य) my,

The way to supreme Liberation does not appear to the child deluded by the illusion of wealth and acting carelessly. For him there is (peace) neither (in) this world nor the next. Such a deluded person falls again and again under my control.

MANTRA. 7.

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ ७ ॥

अन्वयः—यः (भगवान्) बहुभिः श्रवणाय न लभ्यः, शृण्वन्तोऽपि बहवः यम् न विद्युः ॥ कुशलोवक्ता आश्चर्यः ॥ कुशलानुशिष्टः अस्य (वक्तुः) लब्धा (प्राप्ता, यथावत् ब्रह्मस्वरूपवक्तृभूताचार्यप्राप्तिमान्) ज्ञाता श्रोता च आश्चर्यः ॥

श्रवणाय *S*ravanâya (श्रवणार्थं श्रोतुम् M. श्रवणजन्यज्ञानविषयो न भवति) for the sake of hearing, to hear. M. What does not become object of knowledge produced by hearing. R. many persons have not the good fortune of having heard even of the Supreme or the Supreme-liberation.

अपि api, even.

बहुभिः bahubhi*h*, (अनेकैः) by many.

यः yа*h*, who (the God called here the Sâmparâya or Liberator or Here-after) R. The Supreme Self.

न लभ्यः na labhya*h*. (ज्ञान विषयोन भवति) not to be obtained. M. not become the object of knowledge.

शृण्वन्तः अपि } *S*rinvanta*h* M. (शब्दात् तं जानन्तोऽपि) api, even hearing; knowing only by word.

बहवः bahava*h* (अनेके अन्ये) many (others).

यं yam, whom (the Atman).

न विद्युः na vidyû*h* (न विदन्ति अभागिनः, असंस्कृतात्मानो न विजानीयुः M. न जानन्ति कार्त्स्न्येन or यथावत्वेन) did not know (fully or rightly).

आश्चर्यः âscharya*h* (अद्भुतवदेव अनेकेषु कश्चिदेवभवति M. दुर्लभः) wonderful, (rare among the many), difficult to obtain : rare.

वक्ता vaktâ, the speaker. M. (यथावत्स्वरूपोपदेष्टा) who

teaches (Him as He really is); teacher, expounder.

कुशलः Kusalah (निपुणः एव अनेकेषु) able, competent (is the person who after hearing of Atman finds it)

अस्य asya (आत्मनः M. वक्तुः) His (of the Atman or M. of the Speaker).

लब्धा labdhâ, finder M. (प्राप्ता).

आश्चर्यः âscharya, wonderful.

ज्ञाता jnâtâ, knower. M. M. he who comprehends.

कुशलानुशिष्टः Kusalâ'-nusishtah (निपुणेन आचार्येण अनुशिष्टः अन् M. यथावदनुशिक्षितः) taught by an able teacher. M. M. taught properly or ably.

MANTRA 8.

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः । अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमनुप्रमाणात् ॥ ८ ॥

अन्वयः — एषः अवरेण नरेण प्रोक्तः न सुविज्ञेयः भवति, बहुधा चिन्त्यमानः । अनन्यप्रोक्ते अत्र गतिः न अस्ति । अणुप्रामाणात् अणीयान् अतर्क्यम् ॥

न na, not.

नरेण narena (मनुष्येण M. अज्ञानि मनुष्येण) by man (M. by an ignorant man)

अवरेण avarena (हीनेन, प्राकृतिबुद्धिना R. अश्रेष्ठेन,) by an inferior, by a person of uncultured intellect. R. By a person who studies Vedanta merely to acquire learning, not realisation. अवरः avarah (M. अप्रकृष्टः) not excellent.

प्रोक्तः proktah, taught.

एष esha, (आत्मा) this (self).

सुज्ञेयः or सुविज्ञेयः sujneyah or Suvijneyah (सुष्ठुसम्यग्विज्ञेयः विज्ञातुं शक्यः M. सु=सम्यक् यथावत्तया ज्ञेयः) able to be understood well and completely ; M. well understood. M. M. easy to be known.

बहुधा bahudhâ (अनेकधा M.नानाप्रकारेण) in many ways, in diverse modes (such as, whether the self is or is not, is it agent or non-agent, is it pure or non-pure &c. Is it in its aspect of Prakriti, the subordinate, possessed of small attributes, having a natural (un-refined body &c). M. M. often.

चिन्त्यमानः chintyamânah (वादिभिः) thought upon (by the controversialists).

अनन्य–प्रोक्ते ananya-prokte, not another taught (अनन्येन अपृथक दर्शिना आचार्येण प्रतिपाद्यब्रह्मात्मभूतेन or स्वात्मभूते अनन्यस्मिन् आत्मनि or प्रोच्यमानब्रह्मात्मभूतेन आचार्येण M. अहं ब्रह्मणोऽनन्य इति जानन्, स्वात्मब्रह्मणोर्भेदमजानन् ऐक्यमेवजानन् अनन्य उच्यते) by a teacher who does not see another, any thing (separate from himself,) who has realised Brahman. M. who knows " I am not other than Brahman," who knows no difference between Brahman and himself, who knows only the unity. S. The non-other or ananya-Self when the Self is taught.

गतिः gatih (अस्ति नास्ति इत्यादिलक्षणा चिन्ता or अवगतिः or संसारगतिः or अगतिः=अनवबोधः, अपरिज्ञानं M.

ज्ञानं) going. doubts (whether it exists or not &c), or knowledge or transmigration or (if the reading be अगति) want or failure in understanding. M. knowledge. M. M. way. R. संक्रमनं constant coming and going.

अत्र atra (अस्मिन् आत्मनि M. ब्रह्मविषये) here (in the Self or Brahman). R. संसारे here (in this sansâra).

न अस्ति na asti is not.

अणीयान् anîyân, smaller (अतिसूक्ष्मं)

हि hi verily, because.

अतर्क्यम् atarkyam (स्वबुद्धयाऽभ्यूहेन केवलेन तर्केण M. अनुमानागोचरश्च) not conceived by reason ; not to be argued upon, not subject of inference, by arguing with untaught reason only; by reason not illumined by guru. M. M. inconceivable.

अणु-प्रमाणात् anu-pramânât (M. (अणुपरिमाणतः अणीयान्) than the measure of an atom.

It is not understood when taught by an inferior man ; because It has been diversely thought of. When taught by a non-Teacher there is then no going into It. Because it is subtler than the measure of an atom, and not to be argued.

It is not understood well when taught by a person of Lower Intellect), for It has been diversely discussed (by such scholars without coming to any satisfactory conclusion). When taught by a non-spiritual Teacher, there is no going into (undersdtanig) It. Becausc It is subtler than the mensure of an atom, and not to be argued.

The sentence ananya prokte gatih atra nasti, has been the subject of different explanations. Shankara gives the following four explanations.

1. Ananya—one who does not see another, who sees all as one, an Advaiti. Gatih = doubt. " When taught by an Advaiti, there is left no doubt about It."

2. Ananya—not—another, not different from Brahm, the atma being the same as Brahm. Gatih—knowledge or object of knowledge. " When taught as non-different from Brahm, then there remains no other object of knowledge here"—for that is the highest state of knowledge when the unity of the self is realised.

3. Or gatih may mean Samsara gatih, going the round of transmigration. " When the non-otherness is taught then there is no coming back here."

4. Or the word might be agatih " want of penetration or comprehension." " When taught (by a teacher who has realised) the non-otherness, then there is no want of comprehension here." For such a teacher does not merely teach by words, but opens the interior faculty of the hearer, by which he is made capable of understanding the non-duality.

According to Madhva School, this verse means: When taught by a learned but not a (jnani) person, it is inferior teaching, because it has been diversely discussed and is not easy of understanding. But when taught by a non-difference-seer (an Advaiti), there is no knowledge at all (not even of an inferior kind) about it. It is subtler than the measure of an atom (and therefore is not subject of perception); It is not to be understood by reasoning (and therefore not subject of inference.)

The word " anya" should be taken in this verse in the same sense, as in the next verse. There Shankara explains अन्य to mean a Teacher versed in scriptures (agamas) not merely a scholar and a sophist, but a student of sacred science. Ananya अनन्य therefore would mean, a person other than such a Teacher; a mere learned man, a non-spiritual teacher. Madhva is consistent in both verses—in verse 9 he takes anya to mean " another"—i. e. one who knows himself other than or separate from Brahm. In verse 8 therefore " ananya" means one who identifies himself with Brahm.

The Ramanuja School explanation is "The understanding (ava-gatih) which a person gets about the Atma, when taught by a person who has *realised* Brahm and Atma, is impossible to be attained when taught by a person of lower capacity. Or, when taught by a person who has realised Brahm and Atma, then there is no wandering gatih) in Samsara. Or ananya may mean not other *i.e.* one's own self *i.e.* when one tries to learn it by his own effort, he cannot enter into It. Or *ananya* may refer to *avara* of the first line; when taught by a lower mind there is no understanding of It."

MANTRA 9.

नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ । यान्त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ॥ ९ ॥

अन्वयः—यां त्वं आपः, एषा मतिः तर्केण नापनेया । अन्येन एव प्रोक्ता सुज्ञानाय (भवति) बत (अनुकम्पायाम्) सत्यधृतिः असि त्वादृक् प्रष्टा नः भूयात् ॥

न na, not.

एषा eshâ (M. ब्रह्मगोचरामतिः) this (understanding of Brahman.)

तर्केण tarke*n*a स्वबुद्धि—अभ्यूहमात्रेण, by argument (evolved out of one's own brain, untaught by a spiritual teacher)

मतिः mati*h* M. M. doctrine, belief.

आपनेया âpaneyâ (प्रापणीया or अपनेतव्या, हातव्या, बाधनीया M. आ अपनेया इति पदच्छेदः । आनेया अपनेया) to be obtained, to be destroyed, to be fetched.

प्रोक्ता proktâ, declared, taught.

अन्येन anyena, by another (S. आगम-अभिज्ञेन आचार्येण, M. ब्रह्मणोऽन्योऽहं इति जानता प्रोक्ता मतिः तदुपदेशजन्याबुद्धिः)

by a person who knows "I am other than Brahman"; the understanding obtained by being taught by such a person). S. By a teacher who knows the Scriptures.

एव eva, verily, even.

सुज्ञानाय Su-jnânâya (M. सम्यक्ज्ञानायभवति) full understanding or easy to understand, to realise.

प्रेष्ठ preshtha (हे प्रियतम) O dearest.

यां yâm (मतिं) which (doctrine or belief)

त्वं tvam, thou.

आपः âpah (प्राप्तवानसि) hast obtained.

सत्य-धृतिः satya-dhritih (अवितथविषया धृतिः यस्य तव स M. अचाल्यधैर्यवानसि) M. M. true resolve, fixed in truth, M. whose patience is never shaken.

बत bata, oh! (आश्चर्ये) an exclamation of wonder pity.

असि asi, thou art.

त्वा-दृक् tvâ drik (त्वत् तुल्य) like thee.

नो भूयात् no bhûyât (नः=अस्मभ्यं, भूयात्=भवतात्, भवतु) M. न भवेत् or न स्यात्) for us may be. M. there will not be.

नचिकेतः Nachiketah, O Nachiketas!

प्रष्टा prashtâ (पृच्छकः) questioner. M. M. inquirer.

This mental attitude, which thou hast got, should not be destroyed by argument. When taught by the Other (Guru) indeed the Self becomes easily understood, O dearest! Strong is thy resolution. May we have inquirers like thee, O Nachiketas!

MANTRA. 10.

जानाम्यहꣳ शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवन्तत् । ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १० ॥

अन्वयः—शेवधिः अनित्यं इति अहं जानामि हि अध्रुवैः तद्ध्रुवं न प्राप्यते ततः मया अनित्यैः द्रव्यैः नाचिकेतः अग्निः चितः नित्यं प्राप्तवान् अस्मि ॥

जानामि अहं jânâmi aham, I know.

शेवधिः इति sevadhi*h* iti (निधिः) a treasure.

अनित्यं anityam (M. अः=ब्रह्म; अकारवाच्यं च तत् नित्यं च इति अनित्यं) transient. M. the Eternal—Brahman (अ=Brahman). The Brahman known by the letter A is eternal, and is like a treasure.

न हि na hi, not verily.

अध्रुवैः adhruvai*h* (अनित्यैः M. न विद्यते ध्रुवं ब्रह्म येषां तैः; ब्रह्मज्ञानभक्त्यादिहीनैः) by the transient or non-permanent. M. by (those who have) not the (knowledge of the) eternal (Brahman).

प्राप्यते prâpyate, is obtained.

हि hi, because (यतः ततः)

ध्रुवं dhruvam (नित्यं M. शाश्वतंब्रह्म) the eternal, M. the Ancient Brahman.

तत् tat, that.

ततः tata*h*, therefore (तस्मात् कारणात्)

मया mayâ, by me.

नाचिकेतः nâchiketa*h*, the Nachiketa Fire or M. O! Nachiketas.

चितः chita*h*, has been laid.

अग्निः agnih Fire.,

अनित्यैः anityaih (पश्वादिभिः स्वर्गसुखसाधनभूतोऽग्निर्निर्वर्तितः M. or अनित्यद्रव्यैः M. अः ब्रह्म नित्यं सदायेषां विषयतयास्ति or अकारवाच्यं ब्रह्मरूपंनित्यंवस्तु विषयतयायेषामस्ति; तैः) by the not eternal M. by those who have Brahman (अ) always (नित्यं) as an object of meditation, or those who meditate on A as eternal Brahman.

द्रव्यैः dravyaih (पश्वादिभिः M. द्रव्याणि च मनःप्रभृतीनि तैः) things (like cattle &c.) ; M. substances or faculties (like Manas &c. as enumerated in logic).

प्राप्तवान् अस्मि prâptavân asmi, I have obtained.

नित्यं nityam (याम्यं स्थानं स्वर्गाख्यं नित्यं आपेक्षिकं M. शाश्वतं ब्रह्म) eternal (the status of Yama in the Heaven world, which is comparatively eternal). M. or the eternal Brahman.

I know that the Eternal Brahman is a "Treasure"; and that the Permanent is not obtained by (those who have) no (devotion to that) Permanent. Therefore O Nachiketah ! I even have performed the Agnihotra, (in order to learn devotion). And with faculties (mind, senses &c) fixed on the Eternal Brahman, I have obtained the Eternal.

MANTRA. 11.

कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनन्त्यमभयस्य पारम् ।
स्तोम महदुरुगायम्प्रतिष्ठान्दृष्ट्वा धृत्या धीरो नचिकेतो-
ऽत्यस्राक्षीः ॥ ११ ॥

अन्वयः—नचिकेतः धीरः (त्वं कामस्य आप्तिं जगतः प्रतिष्ठां क्रतो

(फलम्) अनन्त्यम् अभयस्यपारं स्तोम महत् उरुगायं प्रतिष्ठां दृष्ट्वा धृत्या अत्यस्त्राक्षीः ॥

कामस्य kâmasya (विस्तादेः) of Desire.

आप्तिं âptim (समाप्तिं M. प्राप्तिं) fulfilment, attainment.

जगतः jagatah, of the world.

प्रतिष्ठाम् pratishthâm (आश्रयं M. प्रतिष्ठापकं) the refuge, the founder, the foundation.

क्रतोः kratoh (फलं हैरण्यगर्भपदं M. भगवदीयकर्मणः or भगवदीयज्ञानस्य) of good deeds (the reward like the states of being a Hiranyagarbha or the First Logos). M. of the works or knowledge (relating to God)

आनन्त्यं anantyam (आनन्त्यं M. आनन्त्यहेतुं, अक्षय्यफलदं) the endless, (M. giving) unexhausting (fruit).

अभयस्य abhayasya, of no fear.

पारं pâram (परां निष्ठां M. तीरं अभयदं) the shore (where there is no fear).

स्तोम Stoma (स्तुत्यं M. स्तोमाः स्तोत्रसाधनभूतामन्त्राः) praise M. the Mantras or hymns of praise.

महत् mahat (अणिमादि ऐश्वर्यादि अनेकगुणसंहतं स्तोमं च तत् महत् च निरतिशयत्वात् M. महान्तं। स्तोमैः साकल्येन प्रतिपादयितुं अशक्यं) great. The Praised One possessed of many attributes like yogic powers of animâ &c. and Lordship &c. That Mighty Praised one. M. That Mighty which cannot be demonstrated by all the Praise-songs of the Vedas.

उरुगायं urugâyam (विस्तीर्णां गतिं M. उरुभिः ब्रह्मादिभिः मुमुक्षुभिः वा गीयते इति उरुगायं) the spacious way

(M. That which leading to Hiranyagarbha) is *sung* by the *great* ones (like Brahmâ &c.)

प्रतिष्ठां pratishthâm (स्थितिं, आत्मनोऽनुत्तमामपि M. मुक्ताश्रयं) the foundation, the rest. M. the refuge of the liberated.

दृष्ट्वा drishtvâ M. (ज्ञात्वा) having seen, or known.

धृत्या dhrityâ (धैर्येण मनोदार्ढ्येन) with firmness of mind M. M. with firm resolve.

धीरः dhîrah (धीमान्) the wise.

नचिकेतः O Nâchiketas.

अत्यस्राक्षीः atyasrakshîh (अतिसृष्टवानसि) rejected (M. अत्यन्तं त्यक्तवानसि) thou hast thoroughly renounced.

O Nachiketas! thou art wise; for with firm resolve thou hast renounced the attainment of desires, having seen (the Brahman who is) the Foundation of the world, the Giver of endless rewards of good deeds, the Shore where there is no fear, the Mighty one praised by hymns, chanted by the Great Ones, the Refuge of all.

MANTRA. 12.

तन्दुर्दर्शङ्गूढमनुप्रविष्टं गुहाहितङ्गह्वरेष्ठम्पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥

अन्वयः—धीरः दुर्दर्शं गूढं अनुप्रविष्टं गुहाहितं गह्वरेष्ठं तं पुराणं देवं अध्यात्मयोगाधिगमेन मत्वा हर्षशोकौ जहाति ॥

तं tam, That.

दुर्दर्शं durdarsam (दुःखेन दर्शनमस्य, अतिसूक्ष्मत्वात् M.

अतिप्रयत्नेनज्ञेयं) difficult to be seen. M. known with great exertion.

गूढम् अनुप्रविष्टं Gûḍham anupravishṭam (गहनं अनुप्रविष्टं प्राकृतविषयविकारविज्ञानैः प्रच्छन्नम् M. गूढं = अनभिव्यक्तं ; अनुप्रविष्टं = प्रेरकतया सर्वजगदतः प्रविष्टं) who has entered into the dark ; M. who is unmanifest and pervades (the whole universe). See I. 29.

गुहाहितं guhâhitam (गुहायां बुद्धौ स्थितं तत्र उपलभ्यमानत्वात् M. सर्वप्राणिहृदयगुहायां हित संस्थितं, M. M. hidden in the cave ; placed in Buddhi, remaining in the hearts.

गह्वरेष्ठं gahvareshṭham (गह्वरे विषमे अनेकानर्थसंकटे तिष्ठति M. मुक्तजीवेस्थितं ॥ संसर्यगम्यत्वात् मुक्तोगह्वरोज्ञेयः) M. M. who dwells in the abyss ; who stays in great difficulties and dangers ; M. who dwells in the Mukta-jivas.

पुराणं purâṇam (पुरातनं) the ancient.

अध्यात्म-योगाधिगमेन adhyâtma-yogâdhigamena (विषयेभ्यः प्रतिसंहृत्यचेतस आत्मनि समाधानम् = अध्यात्म योगः, तस्य अधिगमः M. ध्यानयोगेनजातोऽधिगमः, तेन) by the understanding obtained from Adhyâtma-Yoga or withdrawing the mind from all objects, and fixing it in the self : M. by the knowledge obtained by Dhyâna-yoga or the yoga of meditation. M. M. by means of meditation on the self. Or अध्यात्म— योग = निदिध्यासनं

देवं devam (आत्मानं M. क्रीडादिगुणविशिष्टं) the God (the Atman)

मत्वा matvâ (ज्ञात्वा साक्षात्कारकृत्वा) having thought over or known or realised

धीरः dhîrah (बुद्धिमान्) the wise (having the qualifications of sravana, manana &c.)

हर्ष-शोकौ harsha-sokau, joy and sorrow ; joy at the attainment of objects of desire, sorrow at their non-attainment : being fully satisfied with the bliss of divine knowledge.

जहाति jahâti, leaves behind.

The wise leaves behind joy and sorrow, having known the God by the yoga of concentration of self,—Him who is difficult to be seen, who pervades the universe, who is in the heart of all, who dwells in the Muktas, the Ancient of Days.

MANTRA. 13.

एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य।
स मोदते मोदनीयꣳ हि लब्ध्वा विवृतꣳ सद्म नचिकेतसम्मन्ये ॥ १३ ॥

अन्वयः —(यः) मर्त्यः एतत् श्रुत्वा संपरिगृह्य धर्म्यं प्रवृह्य एतं अणुं आप्य (तिष्ठति सः मर्त्यः) हि मोदनीयं हि लब्ध्वा मोदते । नचिकेतसं (प्रति) सद्म विवृतं मन्ये ॥

एतद् etad (आत्मतत्त्वं यदहं वक्ष्यामि M. ब्रह्म) this (doctrine of Self or Brahman)

श्रुत्वा srûtvâ (महद्भ्यः श्रुत्वा) having heard.

संपरिगृह्य sam-pari-grihyah (आचार्यप्रसादात् सम्यगात्मभावेन परिगृह्योपादाय M. सम्यक्ज्ञात्वा जीवाद्भेदेन मुक्तावेस्थितं ज्ञात्वा आस्ते) fully embraced it, or known it.

Having known It as separate from Jiva, and dwelling in the Mukta jiva.

मर्त्यः martyah (मरणधर्मा) mortal.

प्रवृह्य pravrihya (उद्यम्य, पृथक्कृत्य शरीरादेः M. जीवात् पृथक् कृत्य) having separated or known by discrimination. M. having separated it from the various sheaths and from the various jivas as being distinct from them.

धर्म्यम् or M. धर्मम् dharmyam or M. dharmam (धर्मादनपेतं धर्म्यं M. जगद् धारकं) Being M. the upholder (of worlds)

अणुं anum (सूक्ष्मं) subtle.

एतम् etam (आत्मानं) this (Atman) or M. एनं (भगवतं) = God.

आप्य âpya (प्राप्य) having reached.

स sa, he.

मोदते modate, rejoices.

मोदनीयं modanîyam (हर्षणीयं आत्मानं) what causes rejoicing *i. e.* the Self or God.

हि hi, because.

लब्ध्वा labdhvâ having obtained.

विवृतं vivritam (अपावृतद्वारं, अभिमुखीभूतं M. प्रकटितं) open.

सद्म sadma (ब्रह्मसद्म भवनं M. वैकुंठद्वारं) the house of Brahman, M. the door of Vaikuntha Heaven.

नचिकेतसं nachiketasam, for Nachiketas.

मन्ये manye (जानामि) I know.

Having heard this (teaching of Brahma), and fully comprehending it, the mortal, who separates (It from the Jîvas)

reaches this Subtle Upholder, and rejoices because he has found the Source of all joy. I think that for Nachiketas the abode *of Brahma* is open.

MANTRA. 14.

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥ १४ ॥

अन्वयः—यत् तत् धर्मात् अन्यत्र अधर्मात् अन्यत्र, अस्मात् कृताकृतात् अन्यत्र भूतात् च भव्यात् च अन्यत्र पश्यसि तत् वद ॥

अन्यत्र anyatra धर्मात् dharmât (शास्त्रीयात् धर्मानुष्ठानात् तत्फलात् तत् कारकेभ्यश्च पृथग्भूतं M. धर्म अधर्महीनं) other than Dharma (the performance of scriptural duties, their fruits and their agents) R. End

अन्यत्र अधर्मात् anyatra adharmât, other than non-dharma. R. Means.

अन्यत्र अस्मात् anyatra asmât (प्रभिन्नात्) other than this (manifest)

कृताकृतात् kritâkritât (कृतं=कार्यं, अकृतं=कारणं M. कार्यकारणात्) effect and cause.

अन्यत्र भूतात् anyatra bhûtât (अतिक्रान्तात् कालात्, M. अतीतात्) other than the Past.

च cha and.

भव्यात् च bhavyat cha (भविष्यतश्च तथा वर्तमानात् M. आगामिनश्च) than the future and (the present)

यत् yat (ईदृशं वस्तु सर्वव्यवहारगोचरातीतं) what (thing which transcends all experience.)

तत् tat that.

पश्यसि pasyasi (जानासि) thou seest or knowest.

तत् tat that.

वद vada (मह्यं) say thou (to me).

Different from Dharma, different from Adharma, different from this *chain* of cause and effect, other than past, future, and (present time), that which thou seest, that say thou.

MANTRA. 15.

सर्व्वे वेदा यत्पदमामनन्ति तपांꣳसि सर्व्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यञ्चरन्ति तत्ते पदꣳ सङ्ग्रहेण ब्रवीम्योमित्येतत् ॥ १५ ॥

अन्वयः—सर्वे वेदाः यत्पदं आमनन्ति सर्वाणि तपांसि च यद्वदन्ति यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत्पदं ते सङ्ग्रहेण ओम् इत्येतत् ब्रवीमि ॥

सर्वे sarve, all.

वेदाः vedâ*h*, The Vedas.

यत् yat, what (M. यस्य) whose.

पदं padam (पदनीयं, गमनीयं M. स्वरूपं) word (place, goal) M. nature or real form.

आमनन्ति âmananti (अविभागेन प्रतिपादयन्ति M. मुख्यतया बोधयन्ति) uniformly declare or demonstrate or express principally M M. record.

तपांसि tapâmsi (M. यत्प्रीत्यर्थं सर्वाणि कर्माणि वेदाः वदन्ति) penances or sacrifices or for attaining which penances are taught.

सर्वाणि sarvâ*n*i, all.

च cha, and.

यत् yat, what.

वदन्ति vadanti, they say.

यत् yat, what or whose.

इच्छन्तः ichchhanta*h* (M. यत् प्रीतिम् इच्छन्तः महान्तः)

desiring. M. The great ones desiring Whose satisfaction or wishing to please Whom.

ब्रह्मचर्यम् Brahmacharyam (गुरुकुलवासलक्षणं M. ब्रह्मगोचर श्रवणादिकं ऊर्ध्वरेतस्त्वादिव्रतं वा) the life of a religious student living in the house of his preceptor M. the hearing, meditating etc. in order to realise Brahman ; or the vow of celibacy.

चरन्ति charanti (M. अनुतिष्ठन्ति) perform

तत् tat (पदं) that (word ro goal)

ते te (तुभ्यं) to thee

पदं padam, the word, the state

संग्रहेण sangrahena (संक्षेपतः M. संक्षेपेण) concisely, briefly.

ब्रवीमि bravîmi, I tell

ओं Om (ओं शब्दवाच्यं ओं शब्दप्रतीकं च M. अंगीकारार्थ ओंकारः) It is either the sound or the thing signified by it. M Om I swear or solemnly promise to tellt his to thee.

इति iti

एतत् etat, this

The Goal or the Word which all the Vedas declare, and for Whose sake they lay down austerities, desiring Whom *the great ones* perform Brahmacharya, that Goal or the Word I will briefly tell thee, it is Om. (M. That Goal I shall *verily* tell thee : be sure of it).

MANTRA. 16.

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ १६ ॥

. अन्वयः—एतत् हि एव अक्षरं ब्रह्म (अपरं) एतत् हि एव अक्षरं परं (ब्रह्म) एतत् हि अक्षरं ज्ञात्वा यो यत् (परं अपरं वा) इच्छति तस्य तत् (भवति= सिद्ध्यति) ॥

एतत् etat M. (त्वया पृष्टं) this (which thou hast asked.)

हि hi, verily (हि इयम् अतः शब्दार्थे) or M. (हि शब्दौ उभयत्रमापिद्धि द्योतकौ)

एव eva, even (qualifying ब्रह्म i. e. ब्रह्मैव)

अक्षरं aksharam (M. अविनाशि) syllable M. Indestructible M. M. Imperishable.

ब्रह्म Brahma, Brahman (Inferior Brahman)

एतत् हि एव etat hi eva, for this even.

अक्षरं aksharam (M. परमाक्षर नामकं) syllable or Indestructible.

परं param, the supreme, highest

एतद्धि एव अक्षरं etat hi eva aksharam, this verily even Imperishable.

ज्ञात्वा jnâtvâ (उपास्यब्रह्मेति M. योऽधिकारी ज्ञात्वा) having known.

यः yah (अधिकारी) who

यत् yat (परमपरं M. इष्टं) whatever (higher or lower)

इच्छति ichchhati, (कामयते) desires

तस्य tasya for him

तत् tat, that (takes place or is obtained).

This Indestruclible *is* verily Brahma (as manifested). This Indestructible Om *is* the Highest, (Unmanifest Brahm also) having known this Indestructible One, whatever any one desires that he has.

MANTRA 17.

एतदालम्बनꣳ श्रेष्ठमेतदालम्बनम्परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥ १७ ॥

अन्वयः—एतत् आलम्बनं श्रेष्ठं, एतत् आलम्बनं परं (अपरं च) एतत् आलम्बनं ज्ञात्वा ब्रह्मलोके (परस्मिन् अपरस्मिंश्च) महीयते ॥

एतत् etat (ब्रह्मप्राप्तिः M. त्वयापृष्टं) this (attainment of Brahman or this question asked by thee.)

आलम्बनं âlambanam (M. आश्रयं) support, refuge.

श्रेष्ठं Sreshtham (प्रशस्यतमं, M. सर्वेषां मुख्याश्रयं) best, most praise-worthy, the principal (goal of all).

एतत् आलम्बनं etat âlambanam, this support.

परं param (अपरं च परापर ब्रह्मविषयत्वात् M. परमालम्बन=विलक्षणाश्रयं) highest

एतत् आलम्बनं ज्ञात्वा etat âlambanam jnâtvâ, having known this support.

ब्रह्मलोके महीयते Brahma-loke mahîyate (परस्मिन् ब्रह्मणि अपरस्मिन् च ब्रह्मभूतो ब्रह्मवद् उपास्यः भवति M. भगवत् लोके पूज्यते) M. M. is magnified in the world of Brahmâ. Becomes Brahman, merged in the Higher Brahman, or is worshipped as a Brahmâ if merged in the lower Brahman. M. Is respected or honored in the world of the Lord. Or ब्रह्मैवलोकः=ब्रह्मलोकः, तस्मिन् महीयते पूज्यो भवति Brahma-loka means Brahman itself as the world. Is honored in Brahman.

This refuge *is* the best, this refuge *is* the highest, having known this refuge, he is hailed as " O great One," in Brahma-loka.

MANTRA 18.

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् । अजो नित्यः शाश्वतोऽयम्पुराणो न हन्यते हन्यमाने शरीरे ॥ १८ ॥

अन्वयः—अयं विपश्चित् न जायते म्रियते वा कुतश्चित् न बभूव कश्चित् न बभूव । अयं अजः नित्यः शाश्वतः पुराणः हन्यमाने शरीरे न हन्यते ॥

न na, not.

जायते jâyate (उत्पद्यते) is born.

म्रियते mriyate, dies.

वा vâ, or.

विपश्चित् vipaschit (मेधावी M. ज्ञानी) the wise, the knowing.

न na, not.

अयं ayam (आत्मा M. भगवान्) this (Atma) or Lord.

कुतश्चित् kutaschit (नायमात्मा कुतश्चित् कारणान्तराद् बभूव M. अयं भगवान् कुतश्चिदपि न जायते) from any where (this self does not come out from any other cause) or this Lord is not born from any where, nor does it die, as the Lord is without birth and death, so those who know the Lord, transcend birth and death.

न बभूव कश्चित् na babhûva kaschit (स्वस्मात् च आत्मनः न बभूव कश्चित् अर्थान्तरभूतः M. स्वरूपतो जन्माद्यभावात् च न उक्तरूपजन्मसृती ज्ञानिनः इति संवेन हेतोर सिद्धिनिराशायतैव साधयितुं स्वरूपेण जननंबंधवेलायामपि नास्ति किमतमुक्तौ इति आह "न बभूव &c.") nothing sprang from it. From the Self nothing different from it came

into existence. M. Essentially there is no birth and death, the wise have no such birth and death : but even while in bondage there is no birth for It.

अजः ajah, unborn (essentially, though appearing to be born)

नित्यः nityah, eternal, perpetual.

शाश्वतः sâsvatah (अपक्षय विवर्जितः M. अविकारः) eternal, everlasting, without change or decrease.

अयं ayam, this (M. जीवः jiva)

पुराणः purânah (पुराऽपि नव एवेति M. पुराणं=पुरंदेहं, अणति गच्छति) M. M. Ancient. S. Though old yet ever new. M. That which *enters* (anati) into *bodies* (pura) *i. e.* embodied.

न na, not.

हन्यते hanyate (हिंस्यते) is killed or injured.

हन्यमाने hanyamâne, being killed.

शरीरे sarîre, the body (Locative Absolute) or .

अपि देहे api dehe, even the body.

He is not born, nor doth he die ; nor having been, ceaseth he any more to be ; unborn, perpetual, eternal, and ancient, he is not slain when the body is slaughtered.

MANTRA 19.

हन्ता चेन्मन्यते हन्तुꣳ हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायꣳ हन्ति न हन्यते ॥ १९ ॥

अन्वयः—हन्ता हन्तुं मन्यते चेत् हतः हतम् मन्यते चेत् (तर्हि) तौ उभौ न विजानीतः अयं न हन्ति न हन्यते ॥

हन्ता hantâ, the killer. (M. The jîva is essentially unborn &c. How then one gets the idea that he is the killer or the killed? This idea is merely a delusion as shown in this verse).

चेत् chet (यदि) if.

मन्यते manyate (चिन्तयति) thinks, or meditates.

हन्तुं hantum (हनिष्यामि एनं इति) to kill (If he thinks "I will kill him the Atman") or M. जीव स्वभावं हन्तुं to kill the essential nature of jîva.

हतः hatah, the killed or injured.

चेत् chet, if.

मन्यते manyate, thinks.

हतं hatam (आत्मानं हतोऽहं) killed (*i. e.*) I am killed, my Atma is killed or injured.

उभौ ubhau, both.

तौ tau, they.

न विजानीतः na vijânîtah, do not know or understand (their true self or Jîva)

न अयं na ayam, neither this.

हन्ति hanti, kills.

न हन्यते na hanyate, nor is killed.

If the slayer thinks to slay, if the slain thinks *himself* to be slain, they both do not understand (its nature), for this one neither slays nor is slain.

MANTRA. 20.

अणोरणीयान्महतो महीयान्
आत्मास्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको
धातुः प्रसादान्महिमानमात्मनः ॥ २० ॥

अन्वयः—अस्य जन्तोः गुहायां निहितः आत्मा अणोरणीयान् महतः महीयान् अक्रतुः धातु प्रसादात् तं आत्मनः महिमानं (यदा) पश्यति (तदा) वीतशोकः (भवति) ॥

अणोः anoh (सूक्ष्मात्) than an atom.

अणीयान् aniyân (अणुतरः) more subtle.

महतः mahatah (महत् परिमाणात्) than the great.

महीयान् mahîyân (महत्तरः) greater.

आत्मा âtmâ, the Self.

अस्य asya, of this.

जन्तोः jantoh (प्राणिजातस्य M. जीवस्य) of the creature, of the jîva.

निहितः nihitah (आत्मभूतः, स्थितः M. नितरां स्थितः) placed; remained as self; entirely placed M. M. hidden.

गुहायां guhâyâm (हृदये M. हृदि) in the cavity, in the heart.

तम् tam (आत्मानं) Him (the self)

अक्रतुः akratuh (अकामः M. अकारवाच्य विष्णु विषयक क्रतु मद्भिन निश्चयवान्) free from desire M. Believer (*kratu*) in Vishnu (अ).

पश्यति pasyati M. (साक्षात् विजानाति अयम् अहमस्मि ध्यानद्वारा साक्षात् करोति) sees, realises in meditation, or realises I am that.

वीतशोकः vîta sokah, free from grief or sorrow.

धातुः dhâtuh (मनादीनि करणानि धातवः शरीरस्य धारणात् M. हरेः) of the senses (like Manas &c.), M. of the Hari or Creator. Sankara reads dhâtu prasada as a compound word. Madhva reads it as dhâtuh genitive singular of dhâtri.

प्रसादात् prasâdât, by the grace, or by the tranquility.

महिमानं mahimânam (M. महान्तं, महागुण परिमाणं) the greatness (the great qualities).

आत्मनः âtmanah M. (स्वस्मात्) of the self. M. from himself, as compared to himself.

More subtle than the subtle, greater than the great, the Atman of this Jîva is placed in the cavity: he who is free from desires and beyond grief, beholds by the tranquility of his senses *that* majesty of the soul.

MANTRA. 21.

आसीनो दूरं व्रजति शयानो याति सर्व्वतः ।
कस्तम्मदामदन्देवं मदन्यो ज्ञातुमर्हति ॥ २१ ॥

अन्वयः—(यः) आसीनः दूरं व्रजति शयानः सर्वतः याति तं मदामदं देवं मत् अन्यः कः ज्ञातुं अर्हति ॥

आसीनः âsinah (अवस्थितः, अचलः एव सन्) siting still.

दूरं dûram, far.

व्रजति vrajati, he walks.

शयानः sayânah, lying down.

याति yâti, he goes.

सर्वतः sarvatah, every where.

कः kah, who.

तं tam, That.

मदामदं madâmadam (समदोऽमदश्च, सहर्षोऽहर्षश्च M. मदश्चामदश्च सुखं असुखं ततोभवति इति मदामदं सुखासुखहेतुं) M. M. who rejoices and rejoices not. M. Who is the cause of rejoicing and grief.

देवं devam, the shining one, the god.

मत् अन्यः mat anyah, Another than my self.
ज्ञातुं jnâtum, to know.
अर्हति arhati, is able, or is worthy.

Unmoving it goes afar, resting it moves everywhere who other than my Self is able to know that shining One, the dispenser of pleasure and pain.

MANTRA. 22.

अशरीरꣳ शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥२२॥

अन्वयः—धीरः अनवस्थेषु शरीरेषु अशरीरं अवस्थितं महान्तं विभुं आत्मानं मत्वा न शोचति ॥

अशरीरं asarîram (स्वेन रूपेण आकाशकल्प आत्मा तं) bodiless.
शरीरेषु sarîreshu (देवपितृमनुष्यादि शरीरेषु M. प्राणिदेहेषु) in the bodies (physical, astral and devachanic.)
अनवस्थेषु anavastheshu (अवस्थिति रहितेषु, अनित्येषु M. नश्वरेषु प्राणिदेहेषु अशरीरं तत्शरीरनिमित्तकविकाररहिततया अवस्थितं) in not permanent, among the changing M. In the transient bodies of living creatures, that bodiless one exists, free from the changes that are inherent in bodies. According to Madhva, this word qualifies शरीरेषु.
अवस्थितं avasthitam (नित्यं, अविकृतं) eternal, unchanging. M. existing, or staying in.
महान्तं mahântam (M. देशकालगुणतः महान्तं) great (in regard to Time, space and qualities)
विभुं vibhum (व्यापिनं M. समर्थं) all pervading M. all powerful.

आत्मानं âtmânam M. (स्वामिनं आत्मा ग्रहणं स्वतोऽनन्यत्वं प्रदर्शनार्थं) the self M. the Master, the Lord.

मत्वा matvâ (अयम् अहम् इति) having known (It as "I am this")

धीरः dhîrah (धीमान्) the wise.

न na, not.

शोचति sochati, grieves, M. मुक्तो भवति, He becomes liberated.

The wise, having known that Self *as* resting unembodied in *these* changing bodies, as great and all-pervading, becomes fully liberated.

MANTRA. 23.

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥ २३ ॥

अन्वयः—अयं आत्मा प्रवचनेन न लभ्यः । मेधया (न लभ्यः) बहुना श्रुतेन (न लभ्यः) एषः यमेव (स्वात्मानं) वृणुते तेन लभ्यः तस्य एषः आत्मा स्वां तनूं विवृणुते ॥

न अयम् आत्मा na ayam âtmâ, not this self, or This self is not.

प्रवचनेन pravachanena (अनेकवेदस्वीकरणेन M. व्याख्यानेन) studying many Vedas or sciences M. by commentaries, lectures.

लभ्यः labhyah (ज्ञेयः M. दर्शनीयः) obtained, known, seen.

न मेधया na medhayâ (ग्रन्थार्थधारणशक्त्या M. स्वकीयप्रज्ञाबलेन) nor by understanding, by the power of quickly

apprehending the sense of books. M. by the power of one's own intelligence.

न na, not.

बहुना bahunâ, by much.

श्रुतेन srutena (श्रवणेन) by hearing or learning.

यम् yam (यमेव स्वात्मानं) whom.

एव eva, even.

एष esha साधकः M. (भगवान्) this (seeker of self or M. God)

वृणुते vrinute (प्रार्थयते M. स्वीकरोति यस्मै प्रसीदति इति यावत्) prays to, M. accepts or elects. *i. e.* on whom He shows His grace : with whom He is pleased.

तेन tena (तेनैवाऽऽत्मना वरित्रा स्वयमात्मा लभ्यः ज्ञायते एवम्) by him.

लभ्यः labbyah (ज्ञायते, M. दर्शनीयः) (is) obtainable, knowable, visible.

तस्य tasya, of him or by him (आत्मकामस्य who desires Self alone or M. who is the object of Divine grace प्रसाद विषयस्य)

एष esha, this.

आत्मा âtmâ, the Self.

विवृणुते vi-vrinute (प्रकाशयति M. दर्शयति) reveals, shows.

तनूं tanûm body.

स्वां svâm, (स्वकीयां स्व याथात्म्यम्) own (Its true nature,) M. The direct knowledge can be obtained through the grace of God alone.

This Atma is not to be obtained by many explanations, nor by the Intellect, nor by much learning. It can be

obtained by the Soul by whom it is desired. His soul reveals its own truth. (Madhwa's reading is:—whom alone this Atma selects, by him is it obtained: for him this Atma reveals its own nature)

MANTRA. 24.

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ २४ ॥

अन्वयः—दुश्चरितात् अविरतः एनं न आप्नुयात् अशान्तः (एनं) न (आप्नुयात्) असमाहितः (एनं) न (आप्नुयात्) अशान्त मानसः वा अपि (एनं) न (आप्नुयात्) (किन्तु उक्त विलक्षणः) प्रज्ञानेन एनं आप्नुयात् ॥

M. If He is visible by His grace only, what is the use of Vairâgya &c. ? To this the Shruti replies that jnâna is necessary in order to get that grace.

न na, not.

अविरतः a-vi-ratah, (अनुपरतः M. अनिवृत्तः) ceased to be attached, not turned away.

दुश्चरितात् duscharitât (प्रतिषिद्धात् श्रुतिस्मृति-अविहितात् पाप-कर्मणः) from evil-conduct, from sinful works prohibited by the Vedas and Dharma sastra. M. M. wickedness. Who has not controlled his conduct, not learned दमः ॥

न na, not.

अशान्तः asântah, (अनुपरतः M. श्रवण-मनन-ध्यानैः भगवान्-निष्ठा-रहितः) not tranquil (who has not controlled his mind). M. who is devoid of devotion to the Lord and does not practise study, meditation and contemplation, who has not शमः ॥

न na, not.

असमाहितः a-samâhitah (अनेकाग्रमनाः, विक्षिप्तचित्तः M. यथावस्तु तथा ज्ञानहीनः) not concentrated, not-one-pointed-mind ; mind-dispersed. M. who is devoid of the true knowledge of things. Who does not possess the attribute of समाधानः ॥

न na, not.

अशान्त-मानसः a-sânta-mânasah (व्यापृतचित्तः M. विषय भोगे अलं बुद्धिहीनः, विषय लंपटः) not-tranquil-mind, M. who being immersed in the enjoyment of sense objects, is devoid of right understanding.

वा अपि vâ api, or also.

प्रज्ञानेन prajnânena (ब्रह्म विज्ञानेन M. प्रज्ञानद्वारा) by knowledge. S.. by Brahma-knowledge.

एनं enam (प्रकृतं आत्मानं M. भगवंतं तत्प्रसादं) this (Self or M. God and His grace)

आप्नुयात् âpnuyât, he obtains.

Whosoever has not ceased from wicked ways : is not controlled (in his senses), not concentrated (in his intellect), and is not controlled (in mind) does not obtain this Âtma ; (not) even by knowledge.

Another reading is.—

He who has ceased from evil deeds and *is* controlled (in senses), concentrated (in intellect) and controlled (in mind) obtains this Atma through the knowledge (of Brahma.)

MANTRA. 25.

यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ २५ ॥

अन्वयः — यस्य ब्रह्म च क्षत्रं च उभे ओदनः भवतः यस्य मृत्युः उपसेचनं सः यत्र (वर्तते) इत्थाकः वेदः ॥

यस्य yasya S. आत्मनः (M. भगवतः) of whom or whose (the Self or God)

ब्रह्म Brahma (ब्राह्मणत्व जात्याक्रान्तं वस्तु) the Brâhmana (caste)

च cha, and.

क्षत्रं kshatram (क्षत्रियत्व जात्याक्रान्तं च) the Kshatriya

च cha, and (इतरेतर समुच्चये च यश्चौ उभे ब्रह्मक्षत्रे S. सर्वधर्मविधारके अपि, सर्वत्रानभूते)

उभे ubhe, both.

भवतः bhavatah (स्याताम्) are.

ओदनः odanah (अशनं M. अन्नं) food.

मृत्युः mrityuh (प्राणिनां मारकः) death.

यस्य yasya, whose.

उप सेचनं upa-sechanam (ओदनस्याशनत्वेऽप्यपर्याप्तः M. अद्यमानत्वेऽति अन्नादनसाधनं व्यंजनरूपं) over-sprinkling.

कः kah, who.

इत्था itthâ (इत्थं एवं यथोक्तसाधनवानिव M. इत्थं एवं प्रकारेण तदितिशेषः) thus.

वेद veda (विजानाति) knows.

यत्र yatra (यत्र तिष्ठति) where.

स sa (आत्मा M. एवं जगत् संहर्तृगुणको महाबलः) He (the Atma or the great Destroyer of the universe)

Who thus can know where that (Self) dwells, of whom the Brâhmana and Kshattriya both are as food, and I, Death, am but a sprinkling over it.

अथ प्रथमाध्याये तृतीया वल्ली ।

MANTRA 1.

ऋतं पिबन्तौ सुकृतस्य लोके
गुहाम्प्रविष्टौ परमे परार्द्धे ।
छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेताः ॥ १ ॥

अन्वयः—ये ब्रह्मविदः पञ्चाग्नयः तृणाचिकेताः च (ते) परमे परार्द्धे लोके गुहां प्रविष्टौ सुकृतस्य ऋतं पिबन्तौ छायातपौ वदन्ति ॥

ऋतं ritam (सत्यं, अवश्यं भावित्वात् कर्मफलं M. सुकृतफलं) Truth, the fruit (of work) M. the fruit of good work.

पिबन्तौ pibantau M. (भुंजानौ) both drinkers (S. The word is in the dual number, but should be construed as singular. The real "drinker" is jîva only, not Ishwara. S. The two particular "forms" or aspects of Vishnu, called Atmâ and Antarâtmâ.)

सुकृतस्य sukritasya, (स्वयंकृतस्य कर्मणः ऋतं M. सुकृतस्य लोके = पुण्यसंबंधिनिलोके पुण्यनिर्मित शरीरे हृदयगुहायां) of one's acts, of good deeds. S. to be construed with ritam. Sukritasya ritam = fruit of good deeds or of one's own deeds. M. To be construed with "loke". Sukritasya loke = in the world of the doer of good deeds, in the body formed from the merits of good deed, in the cavity of the heart.

लोके loke (अस्मिन् शरीरे) in the world (in this body)

गुहां guhâm (गुहायां बुद्धौ) in the cavity (Buddhi).

प्रविष्टौ pravishtau, entered.

परमे parame (बाह्यपुरुषाकाशसंस्थानापेक्षया परमम् M. सर्वजीवोत्तमे) in the highest (as compared with the external ether) M. in the best of all Jîvas.

परार्धे or र्ध्ये parârdhe or dhye (परस्य ब्रह्मणोऽर्धं स्थानं; तस्मिन् हि परम् ब्रह्मोपलभ्यते; हार्दाकाशे M. परं ब्रह्मत्यन्तं परेऽय इति वा, आसमन्तात् ऋद्धे प्रभिवृद्धे वानादिपूर्णे मुख्यवायौ) the abode of the Supreme (Brahman) *i.e.* the ether of the heart. M. In the most excellent, exalted, in the Principal Vâyu M. M. Summit.

छायातपौ chhâyâtapau (M. साधु- प्रसाध्वौः, सुखदुःखदौ) like shadow and light. M. good and bad, giving pleasure and pain. S. one transmigrating, the other free from it.

ब्रह्मविदः Brahma-vidah (M. ब्रह्मज्ञानिनः) the knowers of Brahman.

वदन्ति vadanti (कथयन्ति) say.

पंचाग्नयः panchâgnayah (गृहस्थाः M. देवयज्ञ-पितृयज्ञ-भूतयज्ञ-मनुष्ययज्ञ-ब्रह्मयज्ञ रूपं पंच महायज्ञवंतः or द्यु-पर्जन्य पृथिवी पुं स्त्री रूप पंचाग्नि विद्या निष्ठावा) the house-holder. M. the keepers of five fires—*ie.* performers of Deva, Pitri, Bhuta-Manushya and Brahma-Sacrifices. Or who tend the five fires of Chhândogya Upanishad T S. Those who control their five fires or senses or Gârhapatya, Dakshinâgni, Ahavanîya, Sabhya Avasathya.

ये ye, who.

च cha, and.

त्रिणाचिकेताः tri-nâchiketâh (त्रिः कृत्वो नाचिकेतोऽग्निश्चितो यैः ते

M. त्रिणाचिकेताः (कृतत्रिणाचिकेताग्नयः) who perform the triple nachiketa fire sacrifice.

There are two souls (the Higher and the Lower self) both nourished by truth, existing in the world of their own deeds (in their self-madeen vironment) having both entered into the cavity, the highest place of the Supreme. *Them* the knowers of Brahma as *also* the performers of the five fold fires *and* the triple nachiketa sacrifice, declare *to be as* light and its reflection.

MANTRA. 2.

यः सेतुरीजानानामक्षरम्ब्रह्म यत्परम् ।
अभयं तितीर्षतांपारं नाचिकेतꣳ शकेमहि ॥ २ ॥

अन्वयः—यः ईजानानां सेतुः (तं) नाचिकेतं अभयं पारं तितीर्षतां यत् परम् अक्षरं ब्रह्म (तत्) शकेमहि (ज्ञातुं)

यः yah, who.

सेतुः setuh (सेतुरिव M. मर्यादा) bridge, M. boundary, limit.

ईजानानां îjânânâm (यजमानानां कर्मिणां दुःखसंतरणार्थत्वात्) of the sacrificers (M. This word is formed from the root यज्, to sacrifice', with the affix कानच् causing the change of य into ई ॥ विष्णु याजिनां of the performers of karma ; M. the worshippers (of Vishnu).

अक्षरं aksharam (आत्माख्यं) Imperishable, indestructible.

ब्रह्म Brahma, the Brahman.

यत् yat or तत् tat, which or that.

परं param (परमाश्रयं M. उत्तमं) the highest (refuge), the best, Supreme.)

अभयं abhayam (भयशून्यं M. अभयं पारं=अभयपदं तीरं) the free from fear, or fearless; M. the shore which gives security from fear.

तितीर्षतां titîrshatâm (तर्तुम् इच्छतां ब्रह्मविदां M. संसारार्णवं तर्तुमिच्छतां) who wish to cross (the ocean of Samsâra, births and deaths)

पारं pâram (तीरं) shore.

नाचिकेतं nâchiketam (नाचिकेतोऽग्निः, तं ज्ञातुं चेतुं च। M. नचिकेतसं प्रति वाचयं वक्तुं) the Nâchiketa fire M. to Nachiketa. *i.e.* according to S. may we be able to know and collect the Nâchiketa fire. And according to M. "we may be able to tell or teach Nachiketa".

शकेमहि or शकेमहि sakemahi or sakemasi (शक्नुवन्तः M. शक्नुमः The शप् declension is a Vaidic irregularity. The affix मसि is added by Pâ*n*ini VII. I. 46,) may we be able. The higher and the lower Brahmans are respectively the refuge of the karma-kãndins and Brahma-vidas.

May we be able to know both the nachiketas fire and that *One* who is the aim of all worshippers, the imperishable Brahma, the place where no fear is, for those who wish to cross Samsara.

MANTRA 3.

आत्मानꣳ रथिनं विद्धि शरीरꣳ रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३ ॥

अन्वयः—आत्मानं रथिनं विद्धि शरीरं तु रथं एव (विद्धि) बुद्धिं तु सारथिं विद्धि मनः एव च प्रग्रहं (विद्धि) ॥

आत्मानं âtmânam (अनुतपं संसारिणं M. शरीरंतव्यापिनं जीवमेव) the Self (the individual transmigrating evolving, rita-drinking Ego). M. the jîva (pervading throughout the body).

रथिनं rathinan (रथस्वामिनं) the seated in the chariot or the lord of the chariot.

विद्धि viddhi (जानीहि)know thou.

शरीरं sarîram, the body.

रथं ratham, the chariot.

एव eva, even.

तु tu, verily.

बुद्धि buddhim. (अध्यवसायलक्षणां) the Buddhi; the Pure Reason, the power of determining.

तु tu, verily.

सारथिं sârathim, the driver or charioteer.

विद्धि viddhi, know thou.

मनः manah, the Manas, the mind.

प्रग्रहम् pragraham (रशनां) the reins.

एव eva, even.

च cha, and.

Know thou the Atma as seated in the chariot, the body even as the car; Buddhi *is* the driver and Manas *as* the reins.

MANTRA 4.

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ४ ॥

अन्वयः—मनीषिणः इन्द्रियाणि हयान् आहुः तेषु गोचरान् विषयान् (आहुः) आत्मेन्द्रिय मनोयुक्तं (आत्मानं) भोक्ता इति आहुः ॥

इन्द्रियाणि indriyâ*n*i (चक्षुरादीनि) the senses (like eye, ear &c.) The astral body or the body of sensation.

हयान् hayân (अश्वान्) horses.

आहुः âhu*h* (प्राहुः) say (the wise).

विषयान् vishayân (रूपादीन् M. शब्दादीन्) the objects (of senses).

तेषु teshu (इन्द्रियेषु M. तेषां) their.

गोचरान् gocharân (मार्गान् M. अश्वसंचारानुकूलदेशान्) the roads M. the places on which horses can run. The race-course.

आत्म-इन्द्रिय-मनो-युक्तं âtma indriya mano yuktam. (शरीरेन्द्रियमनोभिः सहितं संयुक्तं M. आत्मानं इन्द्रियमनोभिः युक्तं) body-senses-mind-joined. M. The Atmâ in union with senses and mind (astral and mental, is called bhokta or enjoyer).

भोक्ता bhoktâ (संसारी M. सुखदुःखानुभवकृत उच्चस्थनीचत्वभाजं) the enjoyer, the transmigrating ego, the experiencer of pleasure and pain, high and low states.

इति iti, thus.

आहुः âhu*h*, say.

मनीषिणः manîshi*nah* (विवेकिनः M. ज्ञानिनः) the wise.

They say the senses *are* the horses *and* the objects their roads; the wise say that the experiencer is the Atma joined with sense and mind.

MANTRA. 5.

यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५ ॥

अन्वयः—यः (सारथिः) तु अविज्ञानवान् भवति अयुक्तेन मनसा सदा (युक्तोभवति) तस्य सारथेः दुष्टाश्वा इव इन्द्रियाणि अवश्यानि (भवन्ति) ॥

यः yah, who (the Buddhi charioteer)

तु tu, but

अविज्ञानवान् avijnânavân, (अनिपुणः M. विवेकहीनः) without wisdom, not dexterous, without discrimination.

भवति bhavati, is.

अयुक्तेन ayuktena, (अप्रगृहीतेन, असमाहितेन M. अनिगृहीतेन) unjoined: without reins, without balance (of mind), without concentration (of mind)

मनसा manasâ, (प्रग्रहस्थानीयेन) with the mind.

सदा sadâ, always.

तस्य tasya, his (*i. e.* of such a Buddhi charioteer)

इन्द्रियाणि indriyâni, the senses (*i. e.* the horses)

अवश्यानि avasyâni, (अशक्यानि-अनिवारणीयानि) unmanageable, un-controllable.

दुष्टाश्वाः dushtâ-svâh (अदान्ताश्वाः) vicious horses, unbroken or untamed horses.

इव iva, like.

सारथेः sâratheh, of the charioteer.

But he who is without discrimination, and Manas without harmony, his senses are always uncontrolled, like to unbroken horses of a driver.

MANTRA. 6.

यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६ ॥

अन्वयः—यः (सारथिः) तु विज्ञानवान् भवति युक्तेन मनसा सदा (युक्तः भवति) तस्य सारथेः सदश्वा इव इन्द्रियाणि वश्यानि (भवन्ति)

यः yah, who.

तु tu, but.

विज्ञानवान् vijnânavân, having understanding, whose mind-rein is firmly held.

भवति bhavati, is.

युक्तेन yaktena, joined, balanced, harmonised.

मनसा manasa, with the mind.

सदा sada, always.

तस्य tasya, his.

इन्द्रियाणि indriyâni, the senses.

वश्यानि vasyani, manageable, under control.

सदश्वाः sadasvâh, good horses.

इव iva, like.

सारथेः sâratheh, of the charioteer.

But he who discriminates, *has* Manas always harmonised, his senses are controlled, like good horses of the driver.

MANTRA 7.

यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति संसारञ्चाधिगच्छति ॥ ७ ॥

अन्वयः—यः (रथी) तु अविज्ञान् अमनस्कः सदा अशुचिः भवति सः तत्पदं न आप्नोति संसारं च अधिगच्छति ॥

यः yah, who.

तु tu. but

अविज्ञानवान् avijnânavân M. (विवेकाख्यबुद्धिरूपसारथिहीनः) who has no understanding. M. who has not Buddhi as charioteer.

भवति bhavati, is.

अमनस्कः amanaskah (अप्रगृहीतमनस्कः M. अवशीकृतमनस्कः) unmindful, who has not controlled the mind.

सदा sadâ, always.

अशुचिः asuchih, (विषयलम्पटत्वात्) impure (being immersed in sensual gratifications,)

न na, not.

स sa, he (the charioteer.)

तत् पदं tat padam (पूर्वोक्तं अक्षरं यत् परं पदं M. सर्वे वेदा इत्युक्तं ब्रह्मस्वरूपं) that place, (that above-mentioned Imperishable highest Brahman). M. The Padam referred to in II. 15. That goal.

आप्नोति âpnoti, reaches.

संसारं samsâram, the transmigratory circle, the round of births, the current of births and deaths.

च cha, and.

अधिगच्छति adhi-gachchhati, goes over or enters.

He who is without discrimination, and Manas uncontrolled, being always impure, never reaches that Place, but returns again to Samsara.

MANTRA. 8.

यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ ८ ॥

अन्वयः—यः (रथी) तु विज्ञानवान् समनस्कः सदा शुचिः भवति स तु यस्मात् भूयो न जायते तत्पदं आप्नोति ॥

यः yah, who.

तु tu, however.

विज्ञानवान् vign*â*navân, of understanding.

भवति bhavati, is.

समनस्कः samanaska*h*, (युक्तमनाः M. वशीकृतमनस्कः) balanced mind, of controlled mind.

सदा sadâ, always.

शुचिः suchi*h*, pure.

स sa, he.

तु tu, verily.

तत् पदं tat padam, that place or goal.

यस्मात् yasmât, from which (having fallen down).

भूयः bhûya*h*, (पुनः) again.

न na, not.

जायते jâyate (संसारे) is born (in the world).

But he who discriminates, with manas always harmonised and (senses) pure, verily he (reaches) that place from which he is not born again.

MANTRA 9.

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमम्पदम् ॥ ९ ॥

अन्वयः—यः नरः तु विज्ञान सारथिः मनः प्रग्रहवान् (भवति) सः अध्वनः पारं विष्णोः तत्परमं पदं आप्नोति ॥

विज्ञान-सारथिः vij*n*âna-sârathi*h* (विवेक बुद्धि सारथिः M. वशीकृतेन्द्रियवान्) who has understanding for charioteer Lit. Intelligence-driver.

यः yah, who.

तु tu, but.

मनः प्रग्रहवान् manah pragrahavân (प्रगृहीतमनाः) M. M. who holds the reins of the mind समहित चित्तः balanced mind.

नरः narah, man.

सः sah, he.

अध्वनः adhvanah (संसारगतेः M. संसारपदव्याः) of the road or journey (of the rounds.)

पारं - pâram (परमेवाधिगन्तव्यं, मुच्यते सर्वसंसारबन्धनैः M. तीरंभूतं) the end, the shore.

आप्नोति âpnoti, he reaches.

तद् विष्णोः tad vishnoh, (व्यापनशीलस्य ब्रह्मणः परमात्मनः वासुदेवाख्यस्य) of that Vishnu (the all pervading Brahman, the Supreme Self, called Vâsudeva.)

परमं पदं paramam padam (प्रकृष्टं स्थानं M. स्वरूपं) the highest place M. the same form as that of Vishnu.

But the man who has Vijnâna for his charioeter, and holds the reins of Manas, he reaches the end of the road, that highest place of Vishnu.

MANTRA. 10.

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ १० ॥

अन्वयः—अर्थाः हि इन्द्रियेभ्यः पराः मनश्च अर्थेभ्यः परम् । बुद्धिस्तु मनसः परा महान् आत्मा बुद्धेः परः (उच्यते) ॥

Mantra

इन्द्रियेभ्यः indriyebhya*h*, than the senses. M. According to Madhva the present verse refers to the various divinities presiding over the karmendriyas and j*n*anendriyas, as shown below.

Indriyas	*Presiding Divinities*		*Arthas or objects*
Srotra	Soma	Sanparni	Sabda
Tvach	Kubera		Sparsa
Chakshuh	Surya		
Rasana	Varuna	Varuni	Rûpa
Gharna	Aswinau		Rasa
Vach	Agni		
Pani	Indra		
Pada	Jayanta	Pârwati	Gandha
Payu	Yama		
Upastha	Daksha		

The three Devis—Sanpar*n*î, Vâru*n*î and Parvati—preside over arthas; Samparni on Sabda and Sparsa; Vâru*n*î on Rupa and Rasa, and Parvati on Gandha only.

पराः parâ*h* (सूक्ष्माः M. उत्तमाः) higher, subtler, M. superior. M. That is, the three Divinities presiding over arthas are of superior hierarchy to those concerned with the Indriyas.

हि hi, verily.

अर्थाः arthâ*h*, the objects. M. the three divinities presiding over the objects.

अर्थेभ्यः arthebhya*h*, than the objects M. Than the three devis.

च cha, and.

परं param, superior.

मनः manah, the Manas. M. The divinities presiding over the Manas, viz. Rudra, Vîndra (?) and Sesha.

मनसः manasah, than the Manas. M. Than the pre-iding Devas of Manas.

तु tu,

परा parâ, superior.

बुद्धिः buddhih, the Buddhi M. The goddess Saraswati presiding over Buddhi.

बुद्धेः buddheh, than the Buddhi.

आत्मा महान् âtmâ mahân (सर्वप्राणिबुद्धीनां प्रत्यगात्मभूतत्वाद् आत्मा, महान् सर्वमहत्त्वाद् अव्यक्ताद् यत् प्रथमं जातं हैरण्यगर्भं तत्त्वं बोधाबोधात्मकं महानात्मा ॥ M. महत् तत्त्वाभिमानी आत्मा विरिंचः) the great Self S. The Hiranya-garbha. M. The Virincha presiding over Mahat Tattva.

परः parah, superior.

Higher than sensations *are* perceptions, higher than perceptions *is* Manas, Higher than Manas *is* Buddhi, higher than Buddhi, *is* the Mahat Atma.

MANTRA. 11.

महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परम् किञ्चित्सा काष्ठा सा परा गतिः ॥ ११ ॥

अन्वयः—अव्यक्तं महतः परम् पुरुषात् अव्यक्तः परः । पुरुषात् परं किञ्चित् न उच्यते सा काष्ठा सा परागतिः ॥

महतः mahatah, than the Mahat. M. Than the four faced Brahmâ or Virincha.

परम् param, superior, subtler.

अव्यक्तं avyaktam, (सर्वस्य जगतो बीजभूतं अव्याकृतनामरूपसतत्त्वं M. प्रकृति अभिमानिनीश्रीः) the undeveloped. S. The seed of the whole kosmos, unmanifest by name or form, the collection of all forces, effects and causes, variously called Avyakta, Avyakrita, Akasha &c., mixed up with andinherent in the Supreme Self like the web and warp; the power latent in the acorn that gives rise to the oak of the universe. M. The Goddess Srî presiding over Prakriti.

अव्यक्तात् avyaktât, than the Avyakta, M. Than the Sri Tattva.

पुरुषः purusha*h*, the Person, the Purusha. (सर्वपूरणात् M. पूर्णत्वहेतुना पुरुषनामा विष्णुः) M. The Vish*n*u (because he pervades all.)

परः para*h*, Superior, subtler.

पुरुषात् purus*h*at, than the Purusha.

न na, not.

परं param, superior, subtler.

किंचित् kinchit, anything.

सा sâ, he (Feminine pronoun because of the subsequent feminine noun kâshthâ).

काष्ठा kâsh*t*hâ (निष्ठा पर्यवसानं M. अवधिः, देवतातारतम्य विश्रान्तभूमिः) the end, the limit, the goal. The Head of the hierarchies.

सा sâ, he (lit She.)

परा parâ, Supreme, the Great, the best.

गतिः gatih (गन्तृणां सर्वगतिमतां संसारिणां परा प्रकृष्टा गतिः M. परम प्राप्यः) path ; the object of attainment.

The Avyakta is higher than Mahat, the Purusha is higher than Avyakta. There is nothing higher than Purusha. She the end, she the supreme goal.

MANTRA. 12.

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥

अन्वयः—एषः सर्वेषु भूतेषु गूढोत्मा न प्रकाशते सूक्ष्मदर्शिभिः तु अग्र्यया सूक्ष्मया बुद्ध्या दृश्यते ॥

एष esha, (पुरुषः) this (Purusha).

सर्वेषु भूतेषु sarveshu bhuteshu, in all beings (from the highest Brahmâ downwards to a tuft of grass)

गूढः gûdhah (संवृतः M. गूढोत्मा=अन्तर्हित स्वरूपःसन्) hidden M. the hidden Self=the inmost essence or nature of all.

आत्मा atma, self.

न na, not.

प्रकाशते prakâsate, shines forth.

दृश्यते drisyate, is seen.

तु tu, but. M. The force of " but " is to indicate that the Grace of God is the only means of seeing him.

अग्र्यया agrayã (अग्रमिवाग्र्या तयैकाग्रतयोपेतया M. श्रवणादि जनितया भगवत्प्रसादसध्रीचीनया) by sharp, M. by the intellect purified and prepared by the hearing &c. about Brahman, and accompanied by the grace of G d.

बुद्ध्या buddhya, by the Buddhi.

सूक्ष्मया Sûkshmaya, by the Subtle (by the intellect capable of finding subtle things).

सूक्ष्मदर्शिभिः Sûkshma-darsibhih (परं सूक्ष्मं द्रष्टुं शीलं येषां तैः पण्डितैः) by the subtle-seers, by the Pandits.

This is concealed in all beings: *this* Atma does not manifest itself, but is seen through the pointed subtle Buddhi, by men of subtle Sight.

MANTRA. 13.

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥१३॥

अन्वयः—प्राज्ञः वाक् (वाचम्) मनसी (मनसि) यच्छेत्, तत् ज्ञाने आत्मनि यच्छेत्, ज्ञानं महति आत्मनि नियच्छेत्, तत् शान्ते आत्मनि यच्छेत् ॥

यच्छेत् yachchhet (उपसंहरेत्) should merge; cause the laya

वाक् vâk (वागत्रोपलक्षणार्थं सर्वेषामिन्द्रियाणां M. इन्द्रियाभिमानिनः प्रागुक्तान् सोमादीन् वाचि वागभिमानिनीषु पार्वतीवाक्सीसौपर्णीषु यच्छेत इति आदौ योज्यं ॥ वाचं वागभिमानिनीः उमाद्यास्तिस्त्रोदेवीः) the speech. (The speech is taken as a type for all the senses: *i. e.* all the senses must be merged in the manas. M. The Devas presiding over the senses, namely, Soma &c. should be meditated upon, as merging in the three Devîs, Parvati etc, the presiding Devîs of Vâk or Artha. Then the Vâk or the three Devîs should be meditated upon as merging in Manas)

मनसी manasi (मनसि, the long vowel is a Vaidic irregularity) in the Manas M. In the Devas presiding over Manas, *viz*, Siva, Sesha, and Suparna *i. e.* Pârvatî in Siva, Vârunî in Sesha, and Sanparni in Sanparna.

प्राज्ञः prâjna*h* (ज्ञानी) the wise. M. M. A wise man should keep down speech and mind. He takes वाङ्मनसी as a compound and in Acc. dual case.

तत् tat, that (Manas, or M. शिव-शेष-सुपर्णान् स्त्रीम् the Siva, Sesha and Suparna.)

यच्छेत् yachchhet, should merge.

ज्ञाने jnâne (प्रकाशस्वरूपे बुद्धौ M. ज्ञाने आत्मनि = ज्ञानाभिमानिन्योः सरस्वतीभारत्योः) in the (luminous) Buddhi, M. In the Devis, Sarsvati and Bhâratî.

आत्मनि âtmani, in the Self (of Jnâna)

ज्ञानं jnânam (बुद्धिं M. ज्ञानाभिमानिन्यौ सरस्वती भारत्यौ) the Buddhi or M. Saraswati and Bhâratî the presiding devis of Jnâna.

आत्मनि महति âtmani mahati (प्रथमजे M. महत् तत्त्वाभिमानिनोः आत्मशब्दोदितयोः विरिंचवाय्वोः) in Mahat Atmâ; in the first-born, M. In Brahmâ and Vâyu the presiding Deities of Mahat.

नियच्छेत् or तदिच्छेत् niyachchhet or M. tad-ichchhet. Should merge or तत् that (Mahat) इच्छेत् should wish (to merge).

शान्ते आत्मनि sânte, âtmani in the Atma of Peace.

तद् or यच्छेत् शान्ते आत्मनि tad-yachchhet sânte atmani, should merge that in the self which is Peace or Quiet

Let the wise merge the speech in mind, and merge that (manas) in the Jnana Atma. let them merge the Jnana Atma (Manas) in the Mahat Atma (Buddhi) and merge the Mahat Atma (Buddhi) in the Shanta Atma.

MANTRA 14.

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया दुर्गम्पथस्तत्कवयो वदन्ति ॥ १४ ॥

अन्वयः—(हे जन्तवः) उत्तिष्ठत, जाग्रत, वरान् प्राप्यनिबोधत, कवयः तत्पथः दुरत्यया निशिता क्षुरस्य धारा (इव) दुर्गंवदन्ति ॥

उत्तिष्ठत uttishthata (हे जन्तव आत्मज्ञानाभिमुखा भवत M. हे साधवः उत्तिष्ठत नानाविध विषयचिंतनात् निवृत्ता भवत ॥) Arise (O creatures! turn your face towards the acquisition of spiritual knowledge M. O saints! cease thinking of various wordly matters.)

जाग्रत jâgrata (अज्ञाननिद्राया घोररूपायः सर्वानर्थवीज भूतायाः क्षयं कुरुतः) awake (destroy the sleep of ignorance, deep sleep, the seed of all miseries) (M. जागृत आलस्यमुंचत) leave of laziness.

प्राप्य prâpya (उपगम्य) having approached. M. Having obtained.

वरान् varân (प्रकृष्टान् आचार्यान्) the elect, the best Teachers M. प्राप्य वरान्=महद्भ्यो वरान् प्राप्य having obtained *boons* (from the Great ones). Another reading is परान् the Great ones, the High ones.

निबोधत ni-bodhata (अवगच्छत M. नितरां बुध्यध्वं) learn, understand.

क्षुरस्य kshurasya, of a razor M. This describes Samsara.

धारा dhârâ (अग्रं M. धारेव) edge,

निशिता nisitâ (तीक्ष्णीकृता M. अतितीक्ष्णा) sharpened, very sharp.

दुरत्यया duratyayâ (दुःखेनात्ययोयस्याः सा M. दुःखेन: अत्येतव्या सर्तव्या भगवद् बोधाद् अन्येन अत्येतुं अशक्या) difficult to pass over. M. The Samsriti or Samsara is difficult to pass over like the sharp edge of a razor.

दुर्गं durgam (दुः संपाद्यं M. This refers to Brahma knowledge that destroys samsara) diffioult to go ; to be understood with great difficulty.

पथः pathah, the road, the path.

तत् tat, that.

कवयः kavayah, (मेधाविनः M. ज्ञानिनः) the sages.

वदन्ति vadanti, say M. The sages say "the Path which destroys Samsriti is inaccessible or accessible with great difficulty."

Awake, arise having approached the great teachers, learn. The sages say that the road is difficult to travel on, and that the crossing over (of Samsara) is difficult as the sharp edge of a rozor.

Awake, arise, having approached the great teachers, learn. The sages say that that hard Path (of Yoga, for the crossing over Samsara,) is as difficult to travel on as is the sharp edge of a razor.

MANTRA 15.

**अशब्दमस्पर्शमरूपमव्ययं तथाऽरसन्नित्यमगन्धवच्च यत् ।
अनाद्यनन्तम्महतः परन्ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥ १५ ॥**

अन्वयः—यत् अशब्दं, अस्पर्शम्, अरूपं अव्ययं तथा अरसं नित्यं अगन्धवच्च अनाद्यनन्तं महतः परं ध्रुवं तत् निचाय्य मृत्युमुखात् प्रमुच्यते (निचायिता)

अशब्दं asabdam (M. शब्दगुणहीनं, शब्दविदां च, अत्याश्चर्यवस्तुत्वात्) without souud ; not having the attribute of sound, not to be known or perceived through sound.

अस्पर्शं asparsam (M. स्पर्शगुणहीनं, अतश्च त्वगिन्द्रियविषयत्वहीनं) without touch, not to be perceived by touch.

अरूपं arûpam (M. चक्षुर्गोचरत्वहीनं) without form, therefore not to be perceived by the eyes.

अव्ययं avyayam (न व्येति, न क्षीयते M. भौतिकरूपराहित्यादेव अव्ययं = नाशहीनं) without decay, (because he has no material form.)

तथा tathâ, so also.

अरसं arasam, without taste, (रसगुणवर्जितं च अतश्च रसनेन्द्रियाविषयः) wichout the attribute of taste, and so cannot be perceived through taste.

नित्यं nityam, eternal.

अगन्धवत् agandhavat, without smell, not to be perceived by smell.

च cha, and

यत् yat, that which. Madhva takes (नित्यं as adjective qualifying agandhavat (नित्यं गंधवत् न,

अतएव घ्राणाविषयः) "never has smell: therefore, cannot be an object known through smell."

अनादि anâdi (अविद्यमान आदिः कारणमस्य तदिदमनादि M. आदि-अन्तवर्जितं) without beginning or cause.

अनन्तं anantam (अविद्यमानोऽन्तः कार्यमस्य तदनन्तम्) without end or effect.

महतः परं mahatah param (महत् तस्माद्बुद्धि-आख्यात् परं विलक्षणं महत्तत्त्वाभिमानिचतुर्मुखात् परं) beyond the Mahat. S. Higher than or different from Buddhi. M. Above the Four-faced, the presiding deity of Buddhi—Tatva.

ध्रुवं dhruvam (कूटस्थं नित्यं, न पृथिव्यादिवद् आपेक्षिकं नित्यत्वं M. सदैकप्रकारं) the fixed, (the absolutely eternal, not relatively eternal like the matter.) M. Always the same.

निचाय्य nichâyya (अवगम्य M. विचार्य निश्चित्य) having understood or reflected upon, or verified by Sravana etc.

तं tam (आत्मानं) Him.

मृत्यु-मुखात् mrityu-mukhât (मृत्युगोचरात् अविद्या कामकर्म लक्षणात् M. संसृति-बंधात्) from the mouth of death. M from the bondage of Samsara.

प्रमुच्यते pramuchyate (वियुज्यते M. अकर्षेण मुच्यते) is fully liberated or freed.

Having reflected on Him, *whose nature is* not sound, or touch, or form, or taste, or smell, who is changeless, eternal, without beginning and without end, beyond Mahat, eternal in its fixity; he escapes from the mouth of death.

MANTRA 16.

नाचिकेतमुपाख्यानं मृत्युप्रोक्तꣳ सनातनम् । उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥ १६ ॥

अन्वयः—मेधावी मृत्युप्रोक्तं सनातनं नाचिकेतं उपाख्यानं उक्त्वा श्रुत्वा च ब्रह्मलोके महीयते ॥

नाचिकेतं Nâchiketam (नचिकेतसा प्राप्तं M. नचिकेतसः सम्बधि) obtained by Nachiketas or relating to Nachiketas.

उपाख्यानं upâkhyânam, the story.

मृत्यु-प्रोक्तं mrityu proktam, told by Death.

सनातनं sanâtanam (चिरंतनं) the ancient, because Vaidic.

उक्त्वा uktvâ, (ब्रह्मजिज्ञासुभ्यः) having repeated (to Brahma enquirers.)

श्रुत्वा srutvâ (आचार्येभ्य) having heard (from the Teachers.)

च cha, or.

मेधावी medhâvi, the wise man.

ब्रह्मलोके Brahma-loke (ब्रह्मैव लोको ब्रह्मलोकः See II. 17) in the world of Brahman.

महीयते mahîyate (आत्मभूत उपास्यो भवति) becomes worshipped.

A wise man, having repeated the ancient Nachiketas story told by Death, or having heard it (from his teacher) becomes great in Brahma loka.

MANTRA. 17.

य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि ।
प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पत इति ॥ १७ ॥

अन्वयः—यः प्रयतः परमं गुह्यं इमम् (ग्रन्थं) ब्रह्मसंसदि श्राद्धकाले वा श्रावयेत् तत् (श्राद्धं) आनन्त्याय कल्पते ॥

यः yah (कश्चित्) who.

इमं imam (ग्रन्थं) this (book).

परमं paramam (प्रकृष्टं) best. most, greatest.

गुह्यं guhyam (गोप्यं) to be hidden, kept secret, M. mystery.

श्रावयेत् srâvayed (ग्रन्थतः, अर्थतश्च) makes it heard, repeats.

ब्रह्म-संसदि Brahma-samsadi (ब्रह्मवादीनां संसदि) Brahma-session, assembly of persons who are enquirers of Brahman.

प्रयतः prayatah (शुचिर्भूत्वा) being pure ; M. M. full of devotion.

श्राद्ध-काले srâddha-kâle (श्रावयेत् भुञ्जानानां) at the time of srâddha (when the guests are eating)

वा vâ, or

तत् tad, that (srâddha)

आनन्त्याय ânantyâya (अनन्तफलाय) infinity or unendingness. M. M. Infinite rewards.

कल्पते kalpate (संपद्यते) obtains or becomes fitted for (infinity).

तदानन्त्याय कल्पते tad-ânantyaya-kalpate. that Srâddha becomes infinite in its effect.

He who recites this upanishad, the greatest of all mysteries, at an assembly of seekers for Brahma, or, being pure, at the time of a Shrâddha, that Shrâddha creates infinite results.

VALLI IV.

MANTRA. 1.

पराञ्चि खानि व्यतृणत्स्वयम्भू
स्तस्मात्पराङ् पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्ष
दावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥

अन्वयः—स्वयम्भूः (यस्मात्) खानि पराञ्चि व्यतृणत् तस्मात् (द्रष्टा) पराङ्पश्यति अन्तरात्मन् न (पश्यति) अमृतत्वमिच्छन् आवृत्तचक्षुः कश्चिद्धीरः प्रत्यगात्मानमैक्षत् ॥

पराञ्चि parânchi, (पराग् अञ्चन्ति गच्छन्ति M. पराङ् मुखानि) going outwards or forwards, M. turned away face.

खानि khâni (इन्द्रियाणि) the openings; S. M. the Senses.

व्यतृणत् or व्यतृणात् vyatrinat or ât (हिंसितवान्, हननकृतवान् M. कुत्सितानि अकरोत् ॥ तृणकातकरणे) injured, killed, M. made light of, treated with contempt, made them ugly or contemptible. T. S. spread out, or projected or strewn them out.

स्वयम्भूः Swayambhûḥ, (परमेश्वरः, स्वयमेवस्वतन्त्रो भवति सर्वदा न परतन्त्रः M. स्वयमेव भवति, स्वतन्त्रो भगवान्)

the Self-born, the Self-existent, the Supreme God. M. Or the Son of God, the Brahmâ.

तस्मात् tas-mât M. (कारणात्) therefore.

पराङ् parân (पराग् रूपान् अनात्मभूतान् शब्दादीन् M. बाह्यान् विषयान्) outside forms, non-subjective things like sound &c. M. the external objects.

पश्यति pasyati (उपलभते उपलब्धा M. जीवः) sees, experiences (the Experiencer, the Jîvah).

न na, not.

अन्तरात्मन् antar-âtman (अन्तरात्मानं M. आत्मन् = आत्मनः; स्वस्य अन्तः न पश्यति, सदा बहिर्दृष्टिरेवास्ते ॥) The Inner Self. M. The depth (or inmost receses) of his own Self.

कश्चित् Kaschit, some (strong minded persons, like swimmers against the current of a river).

धीरः dhîrah (धीमान्., विवेकी M. ज्ञानी) wise.

प्रत्यगात्मानं pratyagâtmânam, (प्रत्यक् चासौ, आत्मा च इति प्रत्यगात्मा " प्रतीच्येवात्मशब्दो रूढो लोके नान्यस्मिन् ॥ M. प्रत्यग् अन्तः, आत्मानं, स्वान्तस्थं भगवन्तं) The Pratyagâtma, the Subjective Self. M. The Inner Self, the God within.

ऐक्षत् aikshat (अपश्यत् or पश्यति M. ईक्षते) saw (past used for Present *i. e.*) sees.

आवृत्त-चक्षुः âvritta-chakshuh (आवृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकमिन्द्रियजातमशेषविषयात् यस्य स आवृत्तचक्षुः ॥ M. विषयेभ्यः परावृत्तचक्षुरादिकरणः) averted-gaze. Eyes turned away from (external objects.)

अमृतत्वम् (अमरणधर्मत्वं, नित्यस्वभावतां M. मुक्तिं) Immortality M. liberation.

इच्छन् ichchhan, desiring.

The Self-existent turned (the current of) the senses outwards, therefore one sees external objects and not the inner Self; some tranquil minded ones see Pratyag-Atman with eyes turned inwards, desiring liberation.

MANTRA 2.

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् । अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥

अन्वयः — (ये) पराचः कामान् अनुयन्ति ते बालाः विततस्य मृत्योः पाशम् यन्ति अथ धीराः अमृतत्वं ध्रुवं विदित्वा इह अध्रुवेषु (किञ्चित्) नप्रार्थयन्ते ॥

पराचः parâchah (बहिर्गतान् M. बाह्यान्) out-going external.

कामान् kâmân (काम्यान् विषयान्) M. स्रक्-चन्दन-वनितादिविषयान् desires (desired objects, like sweets scents etc.)

अनुयन्ति anu-yanti (अनुगच्छन्ति M. अनुसृत्यतिष्ठन्ति) go after.

बालाः bâlâh (अल्पप्रज्ञाः M. अविवेकिनः) boys; children, persons of small understanding, undiscriminating.

ते te, they.

मृत्योः mrityoh (अविद्याकामकर्मसमुदायस्य) of death (i. e. works done for rewards and through ignorance.

यन्ति yanti (गच्छन्ति M. प्राप्नुवन्ति) go, obtain (or fall into)

विततस्य vitatasya (विस्तीर्णस्य, सर्वतो व्याप्तस्य M. बहुकालीनस्य) the spread out, all-prevading, M. the time worn or eternal M. M. wide-spread.

पाशं pâsam (पाश्यते बध्यते येन तं पाशं, देहेन्द्रियादि संयोग वियोग लक्षणं M. बंधं तत्कृतक्लेशं) the noose; (the union with and separation from body) M. bondage, and the pain thereof. M. M. snare.

अथ atha (तस्माद्) therefore.

धीराः dhirâh (विवेकिनः) the wise (the tranquil.)

अमृतत्वं amritatvam, the Immortality, the moksha.

विदित्वा viditvâ (M. ज्ञात्वा) having known.

ध्रुवं dhruvam. The fixed, the stable, according to both Sankara and Madhva, this word qualifies amritatvam *i. e.* dhruvam amritatvam.

अध्रुवेषु a-dhruveshu (अनित्येषु M. वित्तादिषु विषये) in the unstable (things like wealth etc.)

इह iha, here (in this world or Sansâra.)

न na, not.

प्रार्थयन्ते prârthayante, do not ask for, or look for.

Men of small understanding go after external desires, and they *thus* fall into the wide-extended nooses of Yama, therefore, the controlled in mind, having known liberation, do not here seek for the permanent in the unstable.

MANTRA. 3.

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् ।
एतेनैव विजानाति किमत्र परिशिष्यते ।
एतद्वै तत् ॥ ३ ॥

अन्वयः—येन एतेन एव (विज्ञाता) रूपं, रसं गन्धं शब्दान् स्पर्शान् मैथुनांश्च विजानाति अत्र किं परिशिष्यते (यत्पृष्टं) तद् वै एतत् ॥

येन yena (विज्ञानस्वभावेन आत्मना M. ब्रह्मणा) by whom (according to Sankara this refers to the self, having the nature of consciousness. According to Madhva it refers to Brahman. He further says that the first-two verses of this Valli are spoken by Yama, in indirect praise of Nachiketas. This verse is spoken by Nachiketas, who interrupting Yama's complimentary speech, asks him aboutBrahman).

रूपं rûpam, form.

रसं rasam, taste.

गन्धं gandham, smell.

शब्दान् sabdân, sounds.

स्पर्शान् sparsân, touches.

च cha, and

मैथुनान् maithunân (मिथुननिमित्तान् सुखप्रत्ययान्) couplings, pairs. The perception of pleasure arising from the coming together of pairs M. M. loving (touches).

एतेन एव etena eva, by that even *i. e.* by that Self even, which is separate from the body. Madhva also reads these two words along with येन ; as येन एतेन एव ब्रह्मणा प्रेरितो "ordained by which Brahman, (one knows form &c.)" M. M. takes it as the beginning of a separate sentence. "That by which we know form &c. *by that also* we know what exists besides."

विजानाति vijânâti (विस्पष्टं जानाति) knows, perceives.

किम् अत्र परिशिष्यते kim atra pari-sishyate; lit. What here remains. According to S. (आत्मनो ऽविज्ञेयं किमत्र अस्मिन् लोके परिशिष्यते ? न किंचित् परिशिष्यते ॥ सर्वमेव तु आत्मना विज्ञेयं) "Does anything remain unperceived by the Atmâ in this world? Nothing remains. All verily are known to the Self." According to Madhva (येन एतेनैव ब्रह्मणा प्रेरितो रूपादीन् विजानाति तदेतत् जीवप्रेरकं ब्रह्म अत्र मोक्षे परिशिष्यते ॥ मुक्तजीवप्रेरकत्वेन आस्ते किम् इति प्रश्नार्थः "Became by the command of Brahman the Jîva perceives form &c. while alive; does that Brahman remain *here* (even after liberation) as controller of the Jîvanmukta?"

एतत् वै तत् etat vai tat; lit. "This verily That." M. this is the reply of Yama.

By whom (one perceives) form, taste, and smell, sound, touch and love, even by that he knows (everything else.) Does that (individualised consciousness) remain here (in moksha)? yes: This verily is so.

MANTRA 4.

स्वप्नान्तं जागरितान्तञ्चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ४ ॥

